आपरितोषाद् विदुषाम्

—*—

सुरसरस्वतीसमाराधनव्यसनिभिः कैश्चन सहृदयधुरन्धरैः समुद्भावितया प्रेरणया समुदयमासेदुषी सेयं 'कविभारती' चतुर्भिर्हायनैः क्रमेण तां तान् सरस-सरसान् विदग्धगोष्ठीबन्धान् आयोजयन्ती पदात्पदं निदधाना साहित्यसौहित्योद्भावनाय निरन्तरं व्यवस्यतीतिपरिचितप्रथमिदं वाराणसेयविदुषाम् ।

कमनीयकविव्यापारज आल्हादः सर्वानपि लौकिकानन्द-बिन्दून्धरीकृत्य कमपि परमानन्दसिन्धुमधिगमयति मार्मिक मौलि-मणी निति किं नाम नूतनतया निवेदनीयम् ? । चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेवेति प्राचामाचार्याणां वचांसि चेतश्चम-त्कर्तुमीशते, किं बहुना-परितोषशेखरि समारुढस्वान्तमयूरः सहृदय तल्लजः 'कविता यदि यस्ति राज्येन किम्' इत्युदीरयन् कामपि चरमां विचाररेखामास्त्रयाञ्चकार ।

तदस्मिन् मुकुलितप्राये गीर्वाणवाणीराजीवपुञ्जे कामप्युन्मेष-सुरभितां वेलामुल्लासयितुमियं कविभारती रविदीधितिरुज्जिहाना सर्वैरुपास्या भवतु भूयसा भावुकत्वेनेति विनिवेदनाऽस्माकम् ।

ऐषमः सविशेषः समुन्मेषः कविभारत्याः, यदस्याः कुसुमाञ्जलिसञ्जीवनाय भगवद्वैद्यनाथसनाथः कविराजः श्री दुर्गा-प्रसादशर्मा परिशीलिताऽऽयुर्वेदमर्मा रसायनतरुणीकृतां दृशमादधातीति ।

अयमपरोऽपि सौभाग्यसन्नाहः प्रमोदपरीवाहाय यदस्या अधिवेशने काव्यामृतवापीराजहंसः सहृदयावतंसः श्रीधरोऽपि सरस्वतीपरः सुकृती सोहनीवंशमुक्तामणिः सभानायकपदमूरीकृत्य कामप्यनणीयसीं सुषमामुन्मेषयतीति ।

पर्यन्ते च वारं वारमुदारं सामाजिकशिरोमणीनामुपकारभारं शिरसा मानयन्तो वयमग्रेऽपि निरन्तरनिरन्तरायमपगतमायं तेषां सहयोगसौभाग्यमभ्यर्थयमाना निवेदयामस्तेभ्यः स्वान्तप्रसूनाञ्जलीन् । इति ।

वाराणसी
चैत्रकृष्णत्रयोदशी
२०२६ विक्रमाब्दः

'कविभारती-
कुसुमाञ्जलि'
सम्पादकाः

अभ्यर्हणा

श्रीवैद्यनाथमहिमोन्नतवैभवाय
गीर्वाणवाङ्मयलतासरसाम्बुदाय ।
दुर्गाप्रसादसुधिये कविभारतीयं
सूक्तिप्रसूनमुपदीकुरुते प्रमोदात् ॥

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
१—आपरितोषाद् विदुषाम्	...
२—अभ्यर्हणा	...
३—मंगलम्	...
४—कविभारती	...
५—यज्ञोपवीतम्	१
६—वारिवाहः	७
७—कथं वर्तताम्	१३
८—मौक्तिकम्	१९
९—अद्वैतं सुखदुःखयोः	२३
१०—पूर्णचन्द्रः	२७
११—कौमुदी	३२
१२—महात्मा	३६
१३—दिव्यौषधम्	४४
१४—शरन्निशान्तम्	४८
१५—हिमागमः	५५
१६—कमलिनी	६१
१७—शिशिरः	६४
१८—आनन्दमन्दानिलः	६६
१९—राजते राजनीतिः	६८
२०—सन्ति सन्तो वसन्तः	७४
२१—मंगलम्	७८
२२—राधा	७९
२३—अपोलोयानाष्टकम्	८०
२४—सुस्वागतोयायनम्	८२

मंगलम्

(१)

विद्युल्लेखावरतनुलसत्कान्तिदीप्तावकाशा
देवस्त्रीभिश्चकितचकितं लोचनैः पीयमाना।
शम्भुं वन्द्यं वरयितुमियं मालिकामुद्वहन्ती
देवी बाला तुहिनगिरिजा ज्ञानकामैरुपास्या॥

(२)

मन्दं मन्दं मधुरमधुरं वादयन्ती विपञ्चीं
कण्ठोद्गच्छत्कलपदरसैर्मोहयन्ती सुरौघान्॥
स्वान्तध्वान्तप्रशमनविधौ भानुभासा समाना
सा नो वाणी हृदयकमले सन्ततं सन्निधत्ताम्॥

—श्रीपट्टाभिरामशास्त्री

(१)

धामायितस्फुरितसामा स्मरारितनुवामार्धवासकुशला
कामादिदोषशतदामात्मिका ललितनामावली परिचिता।
भामामणिर्जयति यामाश्रयन्ति ननु रामादयोऽपि तरसा
क्षामाऽपि सा शिखरिजाया विवर्धयतु मामाश्रितं चरणयोः॥

(२)

भासा दरस्फुरितहासात्तया जयसि कासारजस्य सुषमां
नासामणेस्तव च दासायिता जननि! या सारता शशिरुचाम्।
भासादयोऽपि नुतिमासादयन्ति हृदि वासा तवैव गिरिजे!
व्यासादिभिर्नियतमासार्चिता मधुरलासावहा भवसि मे॥

श्रीबटुकनाथ शास्त्री खिस्ते

कविभारती

(१)

यस्याः पदन्यसनझङ्कृतनूपुरस्य
तन्त्रीस्वनेन मधुरेण समेधमानः ।
मञ्जुध्वनिर्वमति कर्णसुधामुदारां
चेतोवतां मनसि खेलतु भारती सा ॥

(२)

कादम्बिनी सुकविकेकिकुलस्य कापि
विद्यावतः सहृदयस्य परा विभूतिः ।
स्फूर्तिः सुखस्य परिभूतिरथाशिवस्य
विश्रामधाम मनसः कविभारती नः ॥

(३)

सद्वृत्तजागरितरक्तविशुद्धवृत्ति-
रानन्दकन्दलितवन्दितभावभूमिः ।
लोकोत्तरस्फुरदनर्घ्यगुणाभिरामा
रामेव राजति पुरः कविभारती नः ॥

(४)

सन्ध्याश्रियः श्रवणकुण्डलमण्डिताङ्गं
हीरप्रभं नयनबन्धनरश्मिसारम् ।
भूषामणिं गुणगणैः कविमत्युदारं
कस्याभिनन्दति मनो न मनोऽनुकूलम् ? ॥

रतिनाथ झाः

यज्ञोपवीतम्

(१)

वामार्धोद्यत्कुचपरिसरालिप्तकाश्मीरनीरै-
रारक्तश्रीः सितभसितभाभासितो दक्षभागे ।
मन्दाक्रान्ताखिलवपुरसौ वासुकिश्चित्रवर्णो
शुद्धां बुद्धिं दिशतु शिवयोर्दिव्ययज्ञोपवीतम् ॥

(२)

सन्ध्या वन्ध्यापदमुपगता देववर्णा न कर्णा-
भ्यर्णं यान्ति क्वचिदपि कथागोचरं यागकर्म ।
सम्प्रत्येकं कतिपयगुणाधारमाराद् द्विजानां
कण्ठोपान्ते लुठति नयनानन्दि यज्ञोपवीतम् ॥

(३)

वदति नववधूटी विप्रकर्मानुरक्तं
दयितमतनुनव्याकल्पविन्याससक्ता ।
शिरसि रचय केशान् छिन्धि सद्यः शिखां तां
परिहर हृदि रज्जुस्पर्धि यज्ञोपवीतम् ॥ ॥

श्रीवटुकनाथशास्त्री खिस्ते

(१)

न विद्या, न वृत्तं, न चित्तं पवित्रं,
प्रियं सत्यमेवामृतं चेन्न वाक्यम् ।
न च त्यागवृत्तिस्तपो निर्मलं नो
कुतो रक्ष्यते तर्हि यज्ञोपवीतम् ॥

(२)

सदाचाररक्तैरुदारान्तरङ्गै-
र्मुदा ब्रह्मविद्यानुरागप्रसारैः ।
प्रशान्तैः समप्राणिसेवाव्रतैश्च
द्विजै रक्षणीयं स्वयज्ञोपवीतम् ॥

(३)

दृषद्भित्तिकासु प्रसह्यारिभिर्ये
चिरं शायिता हन्त, जीवन्त एव ।
कुले सम्प्रभूतैः प्रभूतैस्तु तेषां
मुदे रक्षणीयं स्वयज्ञोपवीतम् ॥

(४)

शिखासूत्ररक्षासु संदीक्षितानां
द्विषः खड्गलेखाभिरुत्खण्डितानाम् ।
परं तुष्टये भव्यसम्भावनाभि-
र्द्विजै रक्षणीयं स्वयज्ञोपवीतम् ॥

(५)

अशेषस्य विश्वस्य तत्त्वानि सम्यक्
तथैव श्रुतेर्दिव्यसन्देशरत्नम् ।
सदा चिन्तयद्भिः परात्मप्रतीकं
गले धार्यते पूतयज्ञोपवीतम् ॥

(६)

अजेयानि जित्वेन्द्रियाणि, प्रगल्भं
मनश्चात्मवश्यं विधाय स्ववश्यम् ।
उदग्रैषणां मर्दयित्वा पदाभ्यां
द्विजै रक्ष्यतामात्मयज्ञोपवीतम् ॥

(७)

न कार्पाससूत्रप्रणीतं स्वरूपं
द्विजानामिदं बोधकं लिङ्गमात्रम् ।
परं वन्द्यसूत्रात्मनो विश्वमूर्त्ते-
र्वपुर्धार्यते दिव्ययज्ञोपवीतम् ॥

(८)

गुणानां गणं स्कन्धदेशे स्वधर्म-
प्रतीकं प्रबोधप्रभारत्नसूत्रम् ।
अनर्घं निधानं च शीलस्य बिभ्रद्
द्विजो राजतेऽद्यापि यज्ञोपवीतम् ॥

(९)

धनं यातु, यातु प्रशास्तृप्रभावो
लयं यातु भव्या विशालापि शाला ।
परं राजतां श्रेयसां सन्निधानं
निधानं गुणानां च यज्ञोपवीतम् ॥

(१०)

न भूभागमात्रस्य संरक्षणेनो-
दयो भारतस्याधुनाप्यर्थनीयः ।
अशान्तेरसन्तोषवृत्तेः प्रजानां
विनाशाय रक्ष्यं तु यज्ञोपवीतम् ॥

(११)

समत्वानुभूतेः प्रभूतप्रभावं
सदा प्रेमवृत्तेः सुवृत्तं पवित्रम् ।
तपोज्ञानतेजोनिधानं विधानं
शुभानामिदं पाहि यज्ञोपवीतम् ॥

(१२)

चिराद् भारतोदारसद्बोधरत्न-
प्रभोद्भासकं नाशकं तामसानाम् ।
श्रुतेः सौरभं लोभनीयं गुणानां
गणं वन्दतां वन्द्ययज्ञोपवीतम् ॥

(१३)

सुकृतशतनिधानं मन्त्रसिद्धिप्रधानं
सुमति-गति-निदानं सर्वसंस्कारसारम् ।
विदितनिगमतत्त्वाचार्यसामीप्यतन्त्रं
सवनसमुपनीतं नौमि यज्ञोपवीतम् ॥

(१४)

कलिकवलितशीलं त्यक्तमर्यादमार्य-
प्रथितकुलयुवानं भोगमात्राभिमानम् ।
गतशमदमवित्तं घोरसंघर्षसक्तं
पुनरुपशमयेद्द्राक् ब्रह्मयज्ञोपवीतम् ॥

(१५)

भवतु भुवि समृद्धं भारतं यन्त्रतन्त्रं
फलतु फलमनल्पं नव्यविज्ञानवल्ली ।
परमिह परमात्मप्रीतिरीतिप्रसारं
जयतु शुभनिधानं ब्रह्मयज्ञोपवीतत् ॥

रतिनाथ झा

(१)

यत्तावद् भारतीयां जनगणनमितां संस्कृतिं पोषयित्रीं,
सर्वाकारेण सम्यक् कथमपि विधृतामग्रपूज्यां करोति ।

येनास्ते वेदरक्षा, सुखसुमतिकृताभाग्यरक्षा यदीये,
क्षेत्रे गण्या, सुरक्षानिकरशतयुतं तद्धि यज्ञोपवीतम् ॥
—शिवदत्तशर्मा चतुर्वेदः

(१)

श्रुतीनां विरावः सदा वक्ति तथ्यं
निधिर्ज्ञानभूतो लपत्येष नित्यम् ।
पुरातत्त्ववेत्ताऽपि दोग्धीह दुग्धं
कलाज्ञानमूलं हि यज्ञोपवीतम् ॥

(२)

इदं सूत्रपुण्यं पवित्रं नितान्तं
समेषां जनानां निनादो निपाठः ।
ऋषीणां गुरूणां पितुःस्तावनी या
सुवाणी भणत्येव यज्ञोपवीतम् ॥
—ज्योतिर्मित्राचार्यः

(१)

स्नानादिभिः शुचिर्भूत्वा श्रावण्यां विधिपूर्वकम् ।
धारयन्तु करे रक्षां स्कन्धे यज्ञोपवीतकम् ॥

(२)

पाश्चात्यसंस्कृतेर्दास ! श्रौतस्मार्तबहिर्मुख ! ।
कथमेतत् त्वया स्कन्धे धृतं यज्ञोपवीतकम् ॥
—श्रीब्रह्मानन्द त्रिपाठी

(१)

रम्ये तुङ्गे विशाले धवलहिममये देवतावासपूते
व्यूढोरस्के हिमाद्रेर्विलसति रुचिरः पावकः शुभ्रवर्णः ।

श्रीगङ्गायाः प्रवाहो सितसलिलयुतः पावनः पावनानां
वक्षोभागे द्विजानामिव जयतितरां शुभ्रयज्ञोपवीतम् ॥

—कमला चुनेकर

(४)

सह्याद्रेः सानुमाला दिनकरकिरणैर्द्योतमानोत्तमाङ्गा
गायन्ती वेदमग्नानिव नदति यदा धीरमेघस्वनेन ।
पङ्क्तिः सा ब्राह्मणानामिव निगमविदां भाति तेजोमयानां
वक्षःस्था नीरधारा परिलसति यथा ब्रह्मयज्ञोपवीतम् ॥

—विमला देवधरः

(१)

यज्ञोपवीतं परमं पवित्रं यद् ब्रह्मणा सूत्रमिदं विनिर्मितम् ।
दैवेऽथ पित्र्येऽपि च तत्समस्ते कार्ये द्विजेनेह सदैव धार्यम् ॥

(२)

नवतन्तुसमाकीर्णं सावित्र्या त्रिगुणीकृतम् ।
यज्ञोपवीतं धार्यं तत् कार्पासादिसमुद्भवम् ॥

—श्रीकृष्णमोहनठक्कुरः

(१)

आयुष्यं बलवीर्यबुद्धिसुकरं सर्वापदां नाशकं
ब्रह्मत्वस्य विधायकं परिलसत्तेजःस्वरूपं नवम् ।
ब्रह्मेन्द्रादिसमादृतं गुणमयं शीतांशुरेखोज्ज्वलं
धार्यं क्षत्रियवैश्यविप्रनिवहैर्यज्ञोपवीतं मुदा ॥

—सुधाकरो मालवीयः

वारिवाहः

(१)

श्यामः कामान् भक्तिभाजां प्रवर्षन्
वृन्दारण्यव्योमवाटीविहारी ।
राधाविद्युद्विभ्रमालिङ्गिताङ्गो
बाधां भिन्द्यात् कोऽपि मे वारिवाहः ॥

(२)

आपूरत्यतितरां तटिनीः पयोभिः
सिञ्चत्यमन्दमभितो वसुधाप्रदेशान् ।
सान्निध्यतोऽपि जगतां परितापहारी
किं वा सुखं न तनुते भुवि वारिवाहः ॥

(३)

सन्मार्गमेव कलुषीकुरुते जलौघै-
र्मण्डूकसर्पनिवहान् समदान् विधत्ते ।
शीतज्वरेण मनुजान् विकलीकरोति
श्रेयः किमर्जयति सम्प्रति वारिवाहः ॥

श्रीबटुकनाथशास्त्री खिस्ते

(१)

उष्णांशुशोषितरसा विरसा रसा द्राक्
श्यामं नवं घनमुदीक्ष्य चिरादुपेतम् ।
रोमाञ्चकञ्चुकवतीवयतोऽस्ति तस्मात्
तां संस्करोति हरितामिह वारिवाहः ॥

(२)

भाति प्रचण्डकिरणोऽथ रजस्वलां तां
सन्तापयन् वसुमतीमपि शुष्ककायाम् ।
कर्त्तुं प्रशान्तमिव दुर्ललितं तमुग्रं
व्योमाङ्गणे विशति सम्प्रति वारिवाहः ॥

(३)

किं गर्जसि, स्फुरसि, नृत्यसि चाम्बरस्थः
सम्भावयन्नमृतगर्भतया स्वमुच्चम् ।
भूदेवतास्नपनकर्मणि संनियुक्त-
स्त्वं किङ्करोऽसिचरमो ननु वारिवाहः ॥

(४)

त्वय्यागते वियति नन्दतु केकिवृन्दं
गायन्तु हर्षभरकर्षकगेहलक्ष्म्यः ।
प्राणाः प्रयान्ति विकला वियुजां परन्तु
सत्यं ततो भवसि तत्र न वारिवाहः ॥

(५)

आच्छादयत्यमलमित्रमपि प्रसह्य
ध्वान्तं विवर्धयति, वारयति प्रभां च ।
उन्मादयत्यतितरामिह निम्नगाश्चेत्
तस्मान्नितान्तमलिनोऽटति वारिवाहः ॥

(६)

आशाङ्गनाललितविभ्रमकल्पनायां
कस्तूरिकातिलकमण्डनतामुपेतः ।
आकाशपद्मनिलयाननसौम्यलक्ष्म्याः
केशोऽस्ति कृष्णवपुषाञ्चितवारिवाहः ॥

(७)

भूमिश्रियो मरकताभरणाञ्चितायाः
श्छायासमाहरणकौतुकितातपत्रम् ।
प्रीतिप्रदो मदिरकेकिकुलस्य शश्वन्
नीलाचलो वियति राजति वारिवाहः ॥

(८)

नैदाघतापपरिवर्धितवारितृष्णे
चेच्चातके क्षिपति नाम्बुपृषन्ति रक्ते ।
पात्रीकृतस्तदिह हन्त, कदर्यतायाः
सर्वात्मना समुदितोऽपि स वारिवाहः ॥

रतिनाथ झा

(१)

सदोन्नतः प्रावृषि कान्तकायो
निरीक्षितः सर्वजनैरजस्रम् ।
रसे रसां मज्जयति प्रकामं
निकामहृद्यः किल वारिवाहः ॥

शिवदत्तशर्मा चतुर्वेदः

(१)

बाधां करोति गगने स्वजनैर्वियोगं
मार्गं च कर्दममयं सरितः सपङ्काः ।
दोषैस्समावृततनोर्भवतोऽवदातं
कस्माद् यशः सुविदितं भुवि वारिवाह ! ॥

(२)

सरसकलनिनादं भेजिरे हंसनादाः
कुसुमसुरभिलुब्धाः किञ्च रोलम्बमालाः ।

क्षितिरभवदपङ्का शैवलं शोषमाप्नोच्
छरदि तुहिनशोभां लेभिरे वारिवाहाः ॥

(३)

चण्डांशोश्चण्डतापैर्व्यथिततनुभृतां तापमुत्सादयन् द्राक्
शुष्काः क्षीणा नदीश्च प्रगुणितपयसा प्लाविताः कर्तुमिच्छुः ।
तोयोत्सर्गाद् दवाग्निं प्रशमयितुमनाः स्वार्थशून्यो यथार्थः
सस्योत्पत्त्या समग्रावनिभरणमतिः शोभते वारिवाहः ॥

श्रीब्रह्मानन्दत्रिपाठी

(१)

सकलगुणनिधीनां लब्धभावातिरेको
विमलमलिनवेषो मण्डितो मानपूर्णः ।
कनकरजतरूपो मानिनीदर्पभेत्ता
परुषपुरुषभूतः कामुको वारिवाहः ॥

(२)

विविध कुसुमपुञ्जैः शिञ्जितश्चारुगात्रः
पथि पथि खलपाथेयं वितीर्यापि काले ।
हरति रसति सारं सारभूतस्य जन्तो-
र्भवतु विमलकीर्त्तिर्मञ्जुलो वारिवाहः ॥

(३)

शोभामाधत्ते मधुकरसमो वाटिकाकल्पलोके
पीत्वा शीधुं, धावति कुहरगुहां, कान्दिशीकः शुभंयुः ।
मन्ये लास्यं यौवनविभवगूढं च कस्याश्चिरिण्ट्या
दाराः प्राज्ञी चालिकुलकलिता, दृश्यते वारिवाहः ॥

(४)

भारत्या देव्याः सकलगुणसंघातव्यानम्रभूता
काचिन्नीवाका कलरणनपूर्णा जयन्तीव दृश्या।
नेयं, केयं ? साऽपि मदगदधात्री पुराणी प्रणीति-
र्दृष्ट्वा श्रुत्वा शान्तसरलमतिर्भासते वारिवाहः ॥

(५)

त्वमेकः शरण्यस्त्वमेको वरेण्यस्त्वमेकः कलाकोविदो नर्मवेत्ता।
त्वमेको जगत्पावनः प्राणनाथः प्रसीद प्रसीदत्वतो वारिवाह ॥

डॉ० ज्योतिर्मित्र आचार्यः

(१)

पुण्ये दिने श्रावणपूर्णिमायाः
सौदामिनीधामभरेण सृष्टम्।
यज्ञोपवीतं हि बिभर्त्ति देहे
ब्राह्मण्यचिह्नं किल वारिवाहः ॥

(२)

श्रीकृष्णे भक्तदासो द्रुपदनृपसुतारक्षको नीलवर्णो
दायादैः पीडितायै वितरति सहसा वस्त्रजालं तथाऽयम्।
वर्षाकाले धरायै मधुरनवजलं शीतलं स्वस्तिरूपं
त्रस्तायै ग्रीष्मतापैर्वितरति च तथा वत्सलो वारिवाहः ॥

(३)

वर्षापूरैः सुखयति धरां ग्रीष्मतापेन तप्तां
सस्यौघं यो रचयति तथा भूमिभागे नवीनम्।
कृत्वा वर्षां प्रलयसदृशीमद्य तस्यां धरायां
कष्टं कष्टं किमिति कुरुते ताण्डवं वारिवाहः ॥

कमला चुनेकरः

(१)

चण्डादित्यप्रखरकिरणैर्दत्तहस्तावलम्बः,
पीत्वाऽऽकण्ठं जलधिसलिलं पूर्णनिर्वृत्तकामः।
बाष्पाध्मातो नभसि विचरन् प्रेक्ष्य तप्ताँस्तृषार्तान्
श्रुत्वाऽऽक्रोशं हसति सहसा गर्वितो वारिवाहः॥

(२)

त्यक्त्वोत्सङ्गं धरायाश्चलति जलधरः खेचरो दर्पभाराद्
ऊर्ध्वादूर्ध्वं व्रजन्तं प्रशमयति गिरिः पाणिना शीतलेन।
प्रत्यायाने विनम्रः स्मरति परस्रजं दुःखभाक् सानुकम्पः
त्रस्तत्राणाय सिद्धः शिथिलयति गतिं वर्षितुं वारिवाहः॥

(३)

नानाशास्त्रसमुद्रमन्थनसमुद्भूतां सुधां शीतलाम्
आकण्ठं परिपीय तप्तहृदयं कृत्वा प्रशान्तं निजम्।
दुःखापन्नजनव्यथां खलु निराकर्तुं सुबोधामृतं
दीनान् प्रापयते कविर्मधुजलं सद्वारिवाहो यथा॥

विमला देवधरः

(१)

अब्धे रसं परिनिपीय यथा सुखं ते
वायुं रथं समधिरुह्य मनोऽनुकूलम्।
आलिङ्गिताश्च तडिदङ्गनया सलीलं
व्योम्नि भ्रमन्ति रसिका इव वारिवाहाः॥

सुधाकर मालवीयः

कथं वर्तताम्

(१)

रसालफलदाडिमप्रभृतिराजजम्बूफले
निपीय मधुरं रसं सुरुचि यस्य यातं वयः ।
स पञ्जरनियन्त्रितो वनविहारकेलीरतः
स्वबन्धुरहितोऽधुना वद शुकः कथं वर्तताम् ॥

—श्रीरामकुबेरमालवीयः

रवीन्दुमहसां चये घनघटाभिराच्छादिते
तमस्युपचितेऽचिरादुदिततीव्रझिल्लीरवे
निशीथसमयाञ्चले प्रियवियोगतापाकुलो
जिजीविषुरयं जनोऽधिविपिनं कथं वर्तताम् ॥

(२)

श्रुतिस्मृतिकथा मृता, विलयमाप यज्ञक्रिया,
पुराणवचनामृतं विषमितं जनैर्दुर्भगैः ।
मनोः कुलमनाकुलं त्यजति तत्पथं सर्वथा
युगेऽत्र कथयाधुना सुकृतवान् कथं वर्तताम् ॥

(३)

मदान्धतिलके प्रभौ, सुहृदि सर्वदोषाकरे,
कुटुम्बिनि कलिप्रिये, प्रियजने ऽपि शाठ्याञ्चिते ।
परापकृतिशालिनि प्रकटरागरक्ते जने
करालकलिकालके कथय रे कथं वर्तताम् ॥

(४)

प्रियस्य सुषमारसस्नपनदीपिताच्छाकृते-
र्निरन्तरदिदृक्षया मनसि लालसां या व्यधात् ।
समागतवति प्रिये स्वपिति, वीतनिद्रा पुन—
र्न पश्यति यदि प्रियं कथय सा कथं वर्तताम् ॥

रतिनाथ झा

(१)

क्षुत्क्षामस्तुतिकार्यभारवहनाद् भग्नांसदृष्टो महा—
दुःखाब्धिप्रसरे तरन् हृतसुखो यत्रास्ति सर्वो जनः ।
यत्र स्वङ्गुलिगण्यमानुषवरैः स्वायत्तमापादितं
वित्तं राष्ट्रियमेव, शोषिततमो देशः कथं वर्तताम् ॥

डा० भोलाशङ्कर व्यासः

(१)

पुरा सहृदयावलीविलसिते महीमण्डले
नृपेषु च गुणावलीदृढ़निबद्धरागेष्वहो ।
लसन्नवपदावली समधिगम्य काष्ठां परा-
मिहाद्य कवितावली कथय रे कथं वर्तताम् ॥

(२)

स्वतन्त्रजनताजनार्दनमनोमुदं तन्वती
धनान्धमतिवैभवान् मदगतान् परं धुन्वती ।
प्रधानतममन्त्रिणी विजयते यदा भारते
पुरास्थितमुरारजी पुनरहो कथं वर्तताम् ॥

(३)

मुरारिपदनूपुरध्वनिरवैः समाह्वानतो
यदीयमुखपंकजे लसति कापि रेखा नवा ।

विसृज्य व्रजवैभवं मधुपुरीं प्रयाते हरौ
गलद्धृदयराधिका कथमहो कथं वर्तताम् ॥

(४)

नृशंसमतिभीषणं प्रलयकालजालोपमं
नदज्जलदसंभृतं विकटमद्यलीलायितम् ।
क्व यान्तु ननु बालकाः, क्व च विपन्ननारीजनो
जलाप्लवनपीडितो जनगणः कथं वर्तताम् ॥

शिवदत्तशर्मा चतुर्वेदी

(१)

पाकिस्तानमिदं पृथङ्नुभुजयोश्छेदः स्वमातुर्भुवो
गोहिंसाभवतीह भारतभुवि स्वे शासने जाग्रति ।
हिन्दूगौरवमूलसंस्कृतमिदं नास्ति त्रिभाषास्वपि
श्रेयः किं सुमहर्घता च परितो ब्रूतां कथं वर्त्तताम् ॥

(२)

छात्राः पर्वतदेशवासिन इह प्रायोऽधुना संस्कृता—
ध्येतारो निजदेशवासिसकला आङ्गलस्य चाध्यायिनः ।
मन्ये संस्कृतलोपमग्निमदिने देशस्य का स्याद्दशा
मिथ्यावञ्चनपापदुर्नयजुषो ब्रूतां कथं वर्त्तताम् ॥

(३)

प्राचीनैः सुकृतैः प्रसन्नहरिणा देहः प्रदत्तो हि मे
यो देहः खलु मोक्षसाधनपरो नाहं तदर्थं यते ।
कामादिप्रबलाः पुरेव रिपवो विघ्नन्ति कृष्णार्चने
संसारे हरि सार इत्यपि जनो जानन् कथं वर्त्तताम् ॥

(४)

वर्षर्तुर्मलयानिलश्च वहते मेघैर्युतं पुष्करं
नृत्यारक्तमयूरजातमधुना दूरे पतिर्वर्तते ।
स्वापो भोजनमत्र सुन्दरवचो नो मेऽधुना रोचते
पीडादानपरायणो रतिपतिः सख्यः ! कथं वर्त्तताम् ॥

नवरङ्गचतुर्वेदी

(१)

पूज्या स्त्रीषु सदा प्रशस्यचरिता दिव्या विरिञ्चेः सुता
साध्वी गौतमरूपधारिहरिणा व्याजेन सन्दूषिता ।
पत्युः शापगिरा शिलातनुभृता भूमौ चिरं पातिता
धूर्तैः कैतववञ्चितातिसरला नारी कथं वर्तताम् ॥

(२)

पाञ्चाली द्रुपदात्मजा नृपसभामध्ये यदा कर्षिता
दायादा न कथं तु पञ्चपतिभिर्वीरैस्तदा मर्दिताः ।
ते दुष्टा धृतराष्ट्र भीष्मसदृशैर्मान्यैर्न निर्भर्त्सिता—
स्त्यक्ता सर्वजनैस्तदा विपदि सा नारी कथं वर्तताम् ॥

(३)

पौलस्त्येन बलाद्धृता स्वभवने बन्दीकृता साऽबला
नो भीता व्रतपालने दृढमतिर्नूनं सती जानकी ।
मर्यादापुरुषोत्तमेन तु पुनः शुद्धाप्युपालम्भिता
संशुद्धाप्यनुकम्पनीयचरिता नारी कथं वर्तताम् ॥

(४)

विश्वामित्रकरे स्वराज्यमखिलं स्वप्ने नृपो दत्तवान्
विक्रीता गृहिणी सती सशिशुका तेनैव तारामती ।

दाहार्थं प्रतिपादितं धनमहो ! सर्पेण दष्टे सुते
क्षिप्तैवं ननु सङ्कटे स्वपतिना नारी कथं वर्तताम् ॥

(५)

दुर्दान्तो निजवीर्यदर्पभरितो लङ्कापती रावणः
संयोक्तुं रघुनायकेन दयितां सीतां स्त्रिया प्रार्थितः ।
मन्त्रः किन्तु न सम्मतो, दशमुखो वा मृत्युना चोदितो
व्यूढा रावणसंनिभेन सरला नारी कथं वर्तताम् ॥

कमला चुनेकरः

(१)

मर्यादापुरुषोत्तमो रघुपतिस्तत्याज पत्नीं शुभां
धर्मोऽथ प्रयुयोज वै पणसमं भार्यां सदाचारिणीम् ।
शास्त्रज्ञा अबलां सदोपदिदिशुर्भार्यां कथं वर्ततां
न ब्रूते खलु कोऽपि शक्तपुरुषं भर्त्तां कथं वर्तताम् ॥

(२)

देवो, राष्ट्रपतिः, प्रधानसचिवः, संरक्षकः, शासको
विज्ञा नागरिका वदन्ति झटिति श्रेष्ठः कथं वर्तताम् ।
सर्वेऽप्यद्य विजानते यदपरो नित्यं कथं वर्ततां
जानीते न तु कोऽपि यत्स्वयमहो कृच्छ्रे कथं वर्तताम् ॥

(३)

आचार्या जगदुः पुरा प्रियवरान् शिष्यान् कथं वर्तता-
माजग्मुर्गुरुसन्निधौ सविनयं श्रद्धान्वितास्ते यदा ।
कालेऽस्मिन् परिवर्तिते नवयुगे शिष्यास्तु दर्पोद्धता
निश्चिन्वन्त्यधुना मुदा निजगुरुर्नित्यं कथं वर्तताम् ॥

विमला देवधरः

कराणामतिभारेण क्षुब्धश्चेत्सकलो जनः।
तदाऽस्मिन्भारतेदेशे व्यापारो वर्ततांकथम् ॥

—सुधाकर मालवीयः

निर्मूले नृपतौ च संस्कृतकथा कुत्राऽपिनो श्रूयते
सर्वेषां तनयाः पठन्ति सततं पाश्चात्यविद्यां नवाम्।
व्यापारे नृपमन्दिरे नयगृहे पत्रालये स्वालये
सत्ताक्षीणतनुर्विवेकसहितो विप्रः कथं वर्तताम् ॥१॥

—ब्रजकिशोर त्रिपाठी

मौक्तिकम्

(१)

काले सज्जनसङ्गमोऽतिकुटिलं पापादुपेतोदयं
नीचं कुत्सितकर्मरक्तहृदयं सद्यः पुनीते ध्रुवम्।
सन्देहो न मनागपीह मनुजैः कार्यो यतः शुक्तिका-
कायं वारिकणो विशन् भवति सच्छायं स्फुरन्मौक्तिकम् ॥

(२)

यत्तत्तीक्ष्णशलाकयास्ति नितरां विद्धं पुनर्लीलया
सूचीभिर्ग्रथितं नितान्तसुदृढे सूत्रे समायोजितम्।
यच्चैवायसपेटिकासु निहितं तत्सुन्दरीणां स्तन-
द्वन्द्वं हारि सुदुर्लभं भजति सद्भाग्याधिकान्मौक्तिकम् ॥

(३)

यासामुन्नतकर्कशस्तनयुगान्मातङ्गकुम्भस्थलं
मात्सर्येण पराजितं नहि पुनस्तत् स्पर्धितुं चेष्टते।
तासामेव कुचद्वयं निजपदन्यासैः सदा मर्दयत्
पुत्रत्वं सफलीकरोति नितरां मातङ्गजं मौक्तिकम् ॥

(४)

अद्यत्वे भुवि कृत्रिमं बहुविधं भासा समुद्भासितं
स्तोकद्रव्यसमर्पणेन सुलभं रत्नं लभन्ते नराः।
लुप्ता वैकटिका, गता नृपतयो, रामारतिर्भूषणाच्-
छिन्ना, तन्मृगयेत को विपणिषु त्वां मूल्यवन्मौक्तिकम् ॥

(५)

न जननीं, जनकं, न सहोदरं गणयतीह जनो गुणिनोऽङ्कने ।
स्मरति कोऽपि न वेणुगजादिकं समुपलभ्य सुदुर्लभमौक्तिकम् ॥

(६)

जटितमाभरणे रमणीतनोर्नरपतेर्मुकुटे च विमण्डितम् ।
कनककान्तिमुपेत्य विभासते स्फुरति केवलमत्र तु मौक्तिकम् ॥

(७)

जगति सा न विराजति शुक्तिका सपदि या जनयेदिह मौक्तिकम् ।
किमधुना न जलं जलदेऽस्ति तद् भवति यत्तु विभास्वरमौक्तिकम् ॥

(८)

स्फुरतु रत्नमनर्घ्यमतिप्रभं बहुविधं विबुधैरपि काङ्क्षितम् ।
जयति माल्यतया विहरत् परं युवतिवक्षसि मञ्जुलमौक्तिकम् ॥

रतिनाथ झा

(१)

लावण्योज्ज्वलकान्तिमान् प्रमुदितप्रायप्रजो धारणा-
द्धारो[1] लोकसभा-सुशुक्तिजनितस्वच्छाम्बुजोत्पादितः ।
सत्सूत्रैरतिलाघवं तु गुणिभिः[2] सन्मन्त्रिभिर्गुम्फितो
दीव्याल्लोकमनःसु बैंकविभवस्वात्मीकृति[3] मौक्तिकः[4] ॥

डॉ० भोलाशंकर व्यास

---

१. धारः, धार्यते धृ + णिच् + घञ् अर्थात् नियमः (Act) पक्षे हारः ।
२, पक्षे गुणिभिः सूत्रग्रथनकरैः 'पटवा' इति प्रसिद्धैः कलाकारैः,
३. बैंकविभवस्य स्वात्मीकृतिर्यस्मिन् सः,
४. (आर्थिक) मुक्ति सम्बन्धी (धारपक्षे), पक्षे मुक्तामयः ।

(१)

त्रुट्यते चेन्मनः स्नेहे, मौक्तिको वापि वेधने ।
योक्तुं नात्र समर्थः स्याद्, विधाता किं नु मानवः ॥

शर्मोपाह्वा प्रेमलता

(१)

स्वमातृचित्तदीपिके मदीयमंजुकन्यके
कथं हि रोदनं सखे निरर्थकं सगद्गदम् ।
न पारयामि वीक्षितुं त्वदीयबाष्पमोचनं
महार्हमूल्यवन्न किं तवाश्रुबिन्दुमौक्तिकम् ॥

(२)

त्वया दत्ता प्रभोमह्यं कृपया मानवी तनुः ।
शुभा विद्या कुले जातिः पतिश्च विदुषां मणिः ॥

(३)

कन्यापुत्रौ सुवृत्तौ मे पुरे वासश्च धूर्जटेः ।
इच्छामि नो धनं हर्म्यं न वा रत्नं न मौक्तिकम् ॥

कमला चुनेकरः

(१)

अभ्यग्रं खरगर्दभस्य मधुरो गीतप्रयासो वृथा,
व्यर्थं काव्यनिवेदनं ह्यरसिके मूढे विरक्ते तथा ।
यत्नः पाययितुं तथैव विमुखं शिष्यं च बोधामृतं
व्यर्थः सूकरसन्निधौ बहुमतं क्षेप्तुं यथा मौक्तिकम् ॥

(२)

संप्राप्तुं गजमौक्तिकं तु विरलप्राप्यं यतन्ते मुदा
लब्धुं शुक्तिजमौक्तिकं पुनरमी नक्राकुले सश्रमम् ।

क्षुब्धाब्धावतरन्ति, किन्त्वरसिकाः संचिन्तयन्ते वृथै-
वायासं श्रुतिमात्रयत्नसुलभं प्राप्तुं सुवाङ्मौक्तिकम् ॥

विमला देवधरः

(१)

संप्राप्तान्युत्तमस्थानं वस्तूनि कान्तिमन्ति हि ।
नासाग्रभागे तन्वङ्ग्याः यथा राजति मौक्तिकम् ॥

सुधाकर मालवीयः

अद्वैतं सुखदुःखयोः

(१)

विश्वस्मिन् विभवेऽपि यस्य विगलद्वस्त्रा तनुः श्रेयसी
स्तोत्रं यस्य च पाणिपीडितमुखोद्वारैकसाराक्षरम् ।
गङ्गावन्हि-भुजङ्ग-चन्द्रशकलान्येकत्र देहे वहन्
अद्वैतं सुखदुःखयोरनुभवत्येकः स योगीश्वरः ॥

(२)

विद्वन्मण्डनमूढयोः कुलवधूवारस्त्रियोः केसरी-
धावद्वारणयोर्दिनेशतमसोः कादम्बकाकोलयोः ।
ऐक्यं चेन्नवजन्मनाऽपि विधिना संपाद्यते कौशलात्
अद्वैतं सुखदुःखयोरिति तदा धत्तां समस्यापदम् ॥

बटुकनाथशास्त्री खिस्ते

(१)

दम्पत्योर्मधुरं प्रेम सौहार्दं निश्छलात्मनाम् ।
मनस्विनामाचरणमद्वैतं सुखदुःखयोः ॥

(२)

आचार्योपासनादाप्तमभ्यासाच्च विवर्धितम् ।
मननादुन्नतं ज्ञानमद्वैतं सुखदुःखयोः ॥

(३)

देशप्रेमप्रवीणानां कारुण्यप्रवणात्मनाम् ।
वर्त्म धर्मात्मनां शश्वदद्वैतं सुखदुःखयोः ॥

(४)

भारतीं भजमानानां श्रद्धापूरितचेतसाम्।
धैर्याद् धामाद्भुतं धन्यमद्वैतं सुखदुःखयोः॥

(५)

राष्ट्ररक्षासु दक्षाणां शत्रुसंहारकारिणाम्।
वीराणां साहसं शस्यमद्वैतं सुखदुःखयोः॥

(६)

प्रियाङ्कपालीपीयूषसिन्धौ कामं निमज्जताम्।
प्रायः सञ्जायते चित्तमद्वैतं सुखदुःखयोः॥

(७)

ध्येयध्यानपरानन्दसन्दोहस्थिरचेतसाम्।
मनोऽनुभवति प्रायेणाद्वैतं सुखदुःखयोः॥

(८)

ऐकमत्यसुधास्वादतृप्तानां गृहमेधिनाम्।
योगिनामिव संस्थानमद्वैतं सुखदुःखयोः॥

(९)

सञ्चये चिरलुब्धानां त्यागे सर्वहुतात्मनाम्।
स्वान्तं भवति निःस्पन्दमद्वैतं सुखदुःखयो॥

(१०)

अमृतस्यन्दिनी कापि सत्कवीन्द्रसरस्वती।
सतां जनयति स्वान्तेष्वद्वैतं सुखदुःखयोः॥

(११)

शीतातपादिकं सर्वं सहतां कर्म कुर्वताम्।
कर्षकाणां च यमिनामद्वैतं सुखदुःखयोः॥

रतिनाथ झा

(१)

योगिनां साधकानाञ्च कवीनां मानिनामपि ।
भवेदुद्योगशीलानामद्वैतं सुखदुःखयोः ॥

(२)

जानकीवृत्तदातारं दृष्ट्वा दूतं मरुत्सुतम् ।
रामस्यालौकिकं जातमद्वैतं सुखदुःखयोः ॥

रामावलम्बशास्त्री

(१)

अर्थानामिन्द्रियस्पर्शः स्पर्शो मानस एव च ।
द्विविधः सुखदुःखानां वेदनानां प्रवर्त्तकः ॥

(२)

सन्तीन्द्रियाणि सन्त्यर्था योगो योगबलान्न चेत् ।
तदात्मनि मनःस्थैर्यादद्वैतं सुखदुःखयोः ॥

दामोदरशर्मा गौडः

(१)

श्रुतिशीलं दयाशीलं यशस्कामं स्वभावतः ।
महात्मानं विजानीयादद्वैतं सुखदुःखयोः ॥

सिद्धिनाथशुक्लः "मधुकरः"

(१)

भगवान् भूतनाथो हि श्मशाने भवने तथा ।
सर्वदैकरसो बाभात्यद्वैतं सुखदुःखयोः ॥

(२)

वियोगे वाऽथ संयोगे सर्वमानन्दमानसः ।
योगीव रमतेयः कोऽप्यद्वैतं सुखदुःखयोः ॥

कृष्णमोहनठाक्कुरः

(१)

गतस्पृहस्थितप्रज्ञज्ञानिनां समदर्शिनाम् ।
वश्यात्मनां हरिप्रेम्णामद्वैतं सुखदुखयोः ॥

(२)

जातु नोद्वेजयेल्लोकान् स्वयं नोद्विजते च यः ।
स्वाध्यायिदेशभक्तादेरद्वैतं सुखदुःखयोः ॥

(३)

श्रुत्वा राज्यपदं पितुर्दशरथान् मोदं दधौ नो मनाक्
कैकेय्या मुखतो वनस्य गमनं मम्लौ न रामस्ततः ॥
श्रीरामस्य सदा प्रसन्नवदनं लोकत्रये राजता—
मद्वैतं सुखदुःखयो रघुपतेः कालत्रये विद्यते ॥

(४)

तस्यास्तस्य वियोगेषु कामसन्तप्तचेतसः ।
पश्यतस्तन्मयं सर्वं—मद्वैतं सुखदुःखयोः ॥

श्री नवरङ्गचतुर्वेदी

(१)

आशुतोषी स्वभक्तेभ्यः शरण्यो वरदो विदाम् ।
गौरीनाथः सदा ते स्यादद्वैतं सुखदुःखयोः ॥

ब्रह्मानन्द त्रिपाठी

पूर्णचन्द्रः

(१)

भूषापदं निटिलसीमनि येन नीतो
बालेभदन्तकुटिलाकृतिरर्धचन्द्रः ।
देयादसौ श्रुतिशतैरुपगेयकीर्त्तिः
श्रेयांसि भक्तहृदयाम्बुधिपूर्णचन्द्रः ॥

(२)

अत्युच्छलद् भगणतोयकणं कलङ्क—
रोलम्बचुम्बितमुखं त्रिदिवोपनीतम् ।
नेत्रोत्पलैस्त्रिदशवामदृशां समर्च्यं
पीयूषभाजनमिदं न तु पूर्णचन्द्रः ॥

श्री बटुकनाथशास्त्री खिस्ते

(१)

ह्रासे विकासं, तिमिरे प्रकाशं चण्डातपे नूतन मेघमालाम् ।
दुःखे सुखं, संहरणे च सृष्टिं निवेदयत्येष न पूर्णचन्द्रः ? ॥

(२)

अङ्के कलङ्कं कलयन् कलाभिः समं समन्तादभिरामरूपः ।
भूपो द्विजानां नवनीतपिण्डो नीलाम्बरे राजति पूर्णचन्द्रः ॥

(३)

अनुदिनमविरामं कर्म सम्पादकानां
सकृदधिकरकञ्जं वेतनं मासि लभ्यम् ।
क्षयसमुदयभावं भावयन् पक्षयुग्मे
शमयति परितापं दैन्यजं पूर्णचन्द्रः ॥

(४)

आमोदयन् कुमुदिनीमपनीततन्द्रो
विश्लेषयन्नथ रथाङ्गमपेतनिद्रः ।
आपूरयन् परमया रमयाऽम्बरस्य
नीलाकृतिं विजयते परिपूर्णचन्द्रः ॥

(५)

क्षिप्रोऽपि हन्त, शिरसः परमेश्वरेण
जाग्रत्कलङ्ककलयाति विलेपितोऽपि ।
राहोः करालदशनेन विचूर्णितोऽपि
दोषाकरो वियति हृष्यति पूर्णचन्द्रः ॥

(६)

न्यासान्नृणां चरणयोर्द्विजराजता तु
लुप्ता नु किं गुरुपराभव पापहेतोः ।
वैज्ञानिकैरसकृदाक्रमणेन सद्यो
व्यर्थीकृतो जगति सम्प्रति पूर्णचन्द्रः ॥

(७)

तापं निवारयति, शीतलतां तनोति,
ध्वान्तं निहन्ति, नयनोत्सवमादधाति, ।
नीलाम्बराञ्चलमलङ्कुरुते, धरित्रीं
दुग्धेन च स्नपयतीव स पूर्णचन्द्रः ॥

(८)

दारिद्र्यमुद्रितसमग्रमनोरथानां
राज्याधिकारहरणोद्यतशात्रवाणाम् ।
सन्त्रासकातरहृदा वियुजां च चित्तं
नैव प्रसादयितुमर्हति पूर्णचन्द्रः ॥

रतिनाथ झा

(१)

विदुषां पूर्णचन्द्रश्चेदर्धचन्द्रो हि विद्विषाम् ।
वारिवेः पूर्णिमायां तु पूर्णचन्द्रः सुखावहः ॥
रामावलम्ब शास्त्री

(१)

युग्मं तु विमुखीभूय म्लायति ग्लायतीव यत् ।
प्रदोषे सेव्यतां तेन पूर्णचन्द्ररसौषधम् ॥
दामोदरशर्मगौडः

(१)

तमांसिभिन्दन् निशि सन्मयूखैः, प्रकाशयन् सर्वं दिशः समन्तात् ।
समस्त लोकानुपकृत्य कृत्यैः, प्रमोदते शारदपूर्णचन्द्रः ॥
सिद्धिनाथशुक्लः "मधुकरः"

(१)

स्वागतमस्तु कवीनां कृतिं नवीनां दिशान्ति ये कृपया
मान्याः सहृदयमणयः सूक्तिनटीदर्पणायितस्वान्ताः ॥

(२)

अद्वैतं सुखदुःखयो रनुभवन्त्येषा विशेषाश्रया
काशीपण्डितमण्डली नयनयोराभाति मे कौमुदी ।
तत्राऽप्यद्यसगद्यपद्यरचनाचातुर्यधुर्यैः कवि-
ग्रामः सज्जनवीरराशि सुखदः स्तात् पूर्णचन्द्रो नवः ॥
वैद्य श्रीकन्हैयालाल भेडा

(१)

प्रियदशनसुदृष्टौ वीक्ष्य बाले ! कपोलौ ।
अलमलमधुनात्वं किं न्हुषे ह्यंशुकेन ॥

प्रियमभिलषितं किं नास्ति चिह्नं नताङ्गि ।
श्रयति न दयितः किं लाञ्छितः पूर्णचन्द्रः ॥

त्र्यम्बकनाथशास्त्री

(१)

इहायातः खानः सकलजनमान्यः शुभो दीप्तचित्तः
समाधौ सन्निष्टः सरलहृदयो भोगहीनो महात्मा ।
असीमः सीमान्तो विविध विरुदस्तोमतापापहारी
तमिस्रं संगाढं हरति परितः पूर्णचन्द्रो विशिष्टः ॥

डा० ज्योतिर्मित्राचार्यः

(१)

पीयूषपिण्डभरितो झषकेतनस्य
संवर्धनाय मसृणान् स्वकरान् समन्तात् ।
विस्तारयन्नभसि भाति कुमुद्वतीनां
चेतः प्रसादनपरः खलु पूर्णचन्द्रः ॥

(२)

फेनचन्दनमादाय समुद्रात्स्वकरैरयम् ।
दिगङ्गनामुखं लिम्पन् पूर्णचन्द्रः प्रकाशते ॥

(३)

अमन्दनयनानन्दं जनयन् गगने निशि ।
भिन्दन् तमः करैर्व्योमहंसश्चन्द्रो विराजते ॥

श्री कृष्णमोहन ठक्कुरः

(१)

अनेकवर्णैः कुसुमैर्मनोज्ञैरनेकरत्नैर्बहुमूल्यलब्धैः ।
प्रियां विचित्रामिव चित्रिताङ्गीं किं कौमुदीमश्नति पूर्णचन्द्रः ।

(२)

शुभ्रैर्मयूखनिचयैः परिवीतमूर्त्ति—
वँप्राभिघातपरिमण्डितचारुदेहः ।
शृङ्गाण्यमुष्य भजते गणभर्त्तुरुक्षः
शङ्कां ददद्धृदि नृणां किमु पूर्णचन्द्रः ॥

श्री नवरङ्गचतुर्वेदी

(१)

सिन्धुः कल्लोललोलः स्फुटति कुमुदिनी कोकयुग्मं निराशं
भूमिर्दुग्धावदाता सपदि विरहिणस्तापमापुः प्रकामम् ।
रात्रिर्नक्षत्ररत्नप्रकटितविभवा तस्कराः कान्दिशीकाः
कस्माज्जाता यतोऽयं समुदयति शरन्नायकः पूर्णचन्द्रः ॥

(२)

देवेशमूर्ध्नि निवसन् सुरसेवया यः
कार्श्यं गतोऽपि न जहाति सुधाप्रदानम् ।
वर्धिष्णुरेव न च लाञ्छनमेव धत्ते
तस्माद् वरः कृशशशी न तु पूर्णचन्द्रः ॥

श्री ब्रह्मानन्दत्रिपाठी

कौमुदी

(१)

अगणितखलज्वालाजालाकुले वसुधातले
क्षणमपि पदन्यासत्रासादुपन्हुतमानसम् ।
सकलजगतां मातः प्रातस्तनाम्बुजलोचने !
शिशिरयतु मां मन्दस्पन्दा तव स्मितकौमुदी ।।

(२)

विमलवदना दिक्सुन्दर्यः समुच्छ्वसितान्तरा
कुमुदसुषमाः ताराहारान् बिभर्ति विभावरी ।
समुदयपदं प्राप्ते चन्द्रे न का प्रणयोन्मुखी
भजति सहजासङ्गं भङ्गं विना ननु कौमुदी ।।

(३)

सुविहितपदन्यासां लब्ध्वा कदाऽपि मनोरमां
परिणतमते ! किं वा कुर्या वृथा कपिचापलम् ।
भवति भवतो मञ्जूषेयं सुवर्णमयी न च
प्रमदविधये ध्वान्तध्वंसक्षमा न च कौमुदी ।।

श्री बटुकनाथशास्त्री खिस्ते

(१)

शब्दागमे महप्राये भ्रमतां सतृषामपि ।
जीवनालम्बनी लोके द्योतते काऽपि कौमुदी ।।

(२)

जलधरस्य जलैरभिषेचितां दिनकरस्य करैरतिभूषिताम् ।
विटपिनां सुमनोभिरलङ्कृतां वसुमतीमभिनन्दति कौमुदी ।।

(३)

बहुविधैः कुसुमैर्नवपल्लवैर्द्विजगणैर्मधुरस्वरमेदुरैः ।
श्रियमुपैति न तां तु वसुन्धरा शरदि यां तनुते शशिकौमुदी ॥

(४)

लयं गते वारिधरेऽतिनिर्मल नभो विताने, लसिते च कानने ।
कलिन्दजाकूलतले विहारिणी विराजते श्यामघनाङ्गकौमुदी ॥

(५)

सुधामुचं वाचमचिन्त्यवैभवा मुदार्पयन्तीव चकोरके द्विजे ।
तदीयसत्कीर्त्तिविभानुलेपनाद् भुवं विभूत्या तनुतेऽथ कौमुदी ॥

रतिनाथ झा

(१)

आपगातीरमासाद्य मीनो महा-
ञ्शोभनो रूप्यरूपो मुधा सर्पति ।
प्रीतिशय्यांशुका काशिका मोहिनी
मोमुदीतीह शुभ्रप्रभा कौमुदी ॥

डा० ज्योतिर्मित्राचार्यः

(१)

आयुर्वेदस्य सिद्धान्तरत्नानि यदि कानिचित् ।
रजोवृतानि गूढानि तमसा सन्ति, मा शुचः ॥

(२)

किञ्चिदेव परिष्काराद्भासन्ते तानि का कथा ।
विज्ञानपूर्णचन्द्रस्य पतेच्चेत्ते षु कौमुदी ॥

(३)

सुधांशो रश्मिसौन्दर्यं केवलं भासते निशि ।
दिवानिशं तु ते बाले मुखचन्द्रस्य कौमुदी ॥

दामोदरशर्मा गौडः

(१)

चेतो मुदे न कस्यास्ति हृद्या नन्द्या हि वन्दिता ।
वैयाकरणकण्ठस्था कौमुदीवाद्य कौमुदी ॥

श्रीकृष्णमोहनठक्कुरः

(१)

कौमुदी यत्र भारत्या राजते बुधसंसदि ।
तत्र विद्युत्प्रकाशस्य गणना कुत एव हि ॥

(२)

कौमुदी पूर्णचन्द्रस्य नभोमण्डलमाश्रिता ।
निराकृत्य तमस्काण्डं प्रकाशयति सर्वतः ॥

रामावलम्बशास्त्री

(१)

चन्द्राननाया दशनच्छविर्वरा
वरा च कामं विमलैन्दवीच्छटा ।
कविद्विजाः काव्यविकासमाधुरीं
वर्षन्ति साऽन्याऽनुपमा हि कौमुदी ॥

त्र्यम्बकनाथशास्त्री

(१)

सुधाकरोऽसौ कविभिः सुनिश्चितः
ततोऽपि पाश्चात्यनिरीक्षकाः प्रिये ।
पुनःपुनर्यान्ति वदन्ति मानवान् ।
न सा सुधा तत्र न चन्द्रकौमुदी ॥

(२)

यथा समस्तप्राणेषु परमात्मा प्रकाशते ।
तथा सम्पूर्णशास्त्रेषु भाति सिद्धान्तकौमुदी ॥

व्रजकिशोरत्रिपाठी

(१)

उच्चैर्नीचै विशदयति या द्राक् समाहारभूमिं
ज्ञानालोकं किरति परितः शुभ्रसूत्रांशुपूर्णा ।
वर्णस्थानान्यपि दिशति या सन्धिविच्छेदकर्त्री
सेयं दिव्या त्रिनयनभवा कौमुदी सुद्ध्युपास्या ॥

(२)

श्रौतस्मार्तविधानेन मनोवाक्कायसंस्कृतान् ।
भक्तिश्रद्धोपपन्नांश्च समाश्रयति कौमुदी ॥

ब्रह्मानन्दत्रिपाठी

(१)

वाटिकायां समुद्यन्तं कनकस्य महात्मनः
रामचन्द्र समन्वेति जानकीनेत्रकौमुदी

सिद्धिनाथशुक्लः

महात्मा

(१)

सञ्चारी तुहिनाचलो नु मनुजाऽऽकरो नु रत्नाकरो
कारुण्यामृतवर्षणैककुतुकी दिव्यो नु धाराधरः ।
सत्त्वश्रीपरिमण्डितोऽखिलगुणाधारो नु बुद्धः स्वयं
सिद्धः कोऽपि धरातले समुदितो गान्धी हताधिव्यथः ॥

(२)

चक्री यो न जनार्दनः स्मरबलध्वंसी विषादी न यो
धाता नीतिपथस्य यो न विदितो लोके रजोमूर्तिभृत् ।
नित्यं पुण्यजनप्रियोऽपि न च यो रात्रिञ्चरः कीर्त्यते
गान्धी भारतभूमिभालतिलकः सोऽयं कथं वर्ण्यताम् ॥

(३)

येनाऽकारि विवेकहारि विगलच्छस्त्रप्रहारव्यथं
जन्यं किञ्चन भारताविनिनवस्वातन्त्र्यसम्प्राप्तये ।
यद्वाचां विसरेण सर्ववसुधावासी जनो निर्मल—
स्वान्तः कान्तगुणो व्यधायि, पदयोस्तस्यैष पुष्पाञ्जलिः ॥

(४)

चित्रचरित्रपवित्रितभुवनत्रितयो नयोन्नतस्वान्तः ।
समजनि महीमहात्मा गान्धी तपसाऽञ्चितो दान्तः ॥

बटुकनाथशास्त्री खिस्ते

(१)

विशाले संसारे निरवधि महाकालकलिते
विपद् व्रातोद्घातैः कवलितसुखे लोकनिवहे ।

सदा सन्तः क्लेशप्रशमनपराः सन्ति बहवो।
महात्मा गाँधी किन्त्वनुपममहात्मा विजयते ॥

(२)

श्रितो नैवारण्यं, न च गिरिगुहां, नाद्रिशिखरं
परित्यागं नैवाकृत परिजनानां यदपि सः।
तथापि प्रख्यातो निखिलजनकल्याणकरणे
महात्मा गाँधी नः शमयति समाजव्यतिकरम् ॥

(३)

सदा सत्याहिंसाप्रभृतिगुणसंवासनिलयः
स्वदेशस्वातन्त्र्योन्नयननयनिष्णातधिषणः।
अनाथानां नाथो हरिजनजनानां च शरणं
महात्मा गाँधी किं भरतभुवि नास्ते निरुपमः ? ॥

(४)

निसर्गेणाखर्वः प्रथमगणनीयो गुणवतां
दरिद्राणां बन्धुर्जयति भुवि गाँधी नयनिधिः।
विदां कण्ठश्लेषं भजति भवभूतेः शिखरिणी
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥

रतिनाथ झा

(१)

भक्तिं योऽभिततान भारतभुवो दुर्यन्त्रणादारणे
यस्यासन्निशिताः शरा इव दयाऽहिंसादयो व्यापकाः।
सत्यस्यैव धनुर्महांस्तदखिलं लक्ष्यं विदेशोद्भवा
गौराङ्गाः पशवः स राष्ट्रनमितो गान्धी महात्मा गतः ॥

(२)

अस्माकं भागधेयाद् वरमिह जगति भ्राजमानं समन्ता—
द्दीप्यत्तेजो दधानः प्रकटनवसुधासारपूर्णां सुवाचम्—।
बिभ्राणः कण्ठदेशे निखिलजनमनोहर्षिणीं कामदात्रीं
स्मेरास्यो विश्ववन्द्यो रिपुगणविनतश्चाविरासीन्महात्मा ॥

(३)

क्षुत्क्षामापि जराकृशापि शिथिलप्रायापि कष्टादशा—
मापन्नापि विपक्षदुर्मदशतघ्नीहन्यमानापि वा
उत्तुङ्गेषु गिरिव्रजेष्विव सदाऽहिंसासनेष्वास्थिता
मूर्तिर्यस्य विजृम्भते स्म जनतानीराजिता सर्वदा ॥

(४)

यस्यैकस्मिन्निनादे हिमगिरिशिखरात्सागरान्ता जनानां—
हृत्तन्त्री झांकृतिं तामभिनवसरणिं विश्वनम्यां ततान।
यस्यैवासीदहिंसा प्रकटितविभवा शस्त्रजालावृताङ्गी
गौराङ्गाणां विनाशे सुविदितमहिमा नौमि गान्धिं विभुं तम् ॥

शिवदत्तशर्मा चतुर्वेदः

(१)

जयत्यसौ सत्यतपा महात्मा गान्धी परार्थार्पितगेहदेहः।
पितास्य राष्ट्रस्य च वन्दनीयो विश्वस्य गोप्ता गवामनन्यः ॥

(२)

रिपुष्वपि स्थापितसख्यभावोऽहिंसापरोऽपि प्रतिहिंस्रभावान्।
जितेन्द्रियः सौम्यवपुर्विशुद्धः कायेन वाचा मनसा समन्तात् ॥

(३)

वाग्यस्य वेदाः, सकलाः प्रयोगा मीमांसयोक्तैः सदृशा हि यज्ञैः।
वेदान्तरूपास्तु खलूपदेशा मता यदीया भुवि तेऽधुनाऽपि ॥

(४)

तर्काप्रतिष्ठां मनुते स्म तुल्यो वेदप्रमात्वं प्रतिपादयद्भिः ।
अतोऽन्तरात्मानमसौ महात्मा गान्धी प्रमाणं वदति स्म नित्यम् ॥

(५)

शान्तो दान्तस्तितिक्षुर्व्यपरतविषयव्रातलेशो गृहस्थो-
ऽप्यद्धोदारः समस्मिन् मनुजकुलभवे यो द्विजो वाऽन्त्यजोवा ।
नो तुच्छं कृत्यमस्मै बृहदपि किमपि स्वस्वमाहात्म्यसाम्याद्,
दार्ढ्यात्तुल्यो हिमाद्रेः समभवदिह योऽसौ महात्मा हि गान्धी ॥

(६)

सिन्धुः कारुण्यवारामवमतजनताबन्धुरेको युगेऽस्मिन्,
सेतुर्दुःखार्णवानां तटमिह स परं यातुकामस्य जातः ।
हेतुर्यो भारतस्याब्दकशतनिकरैः पारतन्त्र्यं गतस्य,
स्वातन्त्र्येऽहिंसयाऽभूत् प्रबलतररिपावेष गान्धी महात्मा ॥

(७)

गौराङ्गगरुडैर्नाशं यान्तो येऽम्बाधरात्मजाः ।
तदुद्धृत्यै ह्यभूद्गान्धी भूयो जीमूतवाहनः ॥

(८)

कर्मचन्द्रात्तु जातत्वाद् विश्वेषां मोहनादपि ।
दासः सेवा परार्थत्वात् सार्थसंज्ञं तमीड्महे ॥

केदारनाथः त्रिपाठी

(१)

लब्धमिदं सहजं स्वातन्त्र्यं
यत्कृपया किल हिन्दुस्ताने ।
देश्यजनैरधिगेया कीर्ति-
र्यस्य जयेत् स महात्मा गान्धी ॥

(२)

गौराङ्ग्यैर्या निबिड़निगड़नद्धा माता
सत्याहिंसा खरतरशरपातैर्येन ।
रक्तोत्पातं भरतभुवि विना संमुक्ता
पौरैर्वन्द्योऽधि जयति स महात्मा गान्धी ॥

डा० भोलाशंकरो व्यासः

(१)

दिगन्ते श्रूयन्ते धवल धवलाः कीर्त्तिनिकरा
विदेशीयैर्गौरैरमितगुणपूतं परिहृतम् ।
अहिंसा शस्त्रास्त्रैः सपदि खलु सत्यं कलितवान्
महात्माऽसौ गान्धी जयति जनमान्यो गुणगणः ॥

डा० ज्योतिर्मित्राचार्यः

(१)

महात्मा गान्धी यो भुवनतलरत्नं समभवत्
स्वदेशस्वातन्त्र्यं कठिनतपसा प्राप परमम् ।
अनेकैर्वर्षैर्यान् विविध परपीडां गतवतः
स्वकीयान् बन्धून् यो विगत बहुदुःखान् समकरोत् ॥

(२)

गोरण्डादिनिपीडितान् बहुविधक्लेशं गतान् भारते
दृष्ट्वा खिन्नमनाः स्वशक्तिकलतस्तस्मान् मुमोचाशु यान् ।
नो यूयं स्वजनेषु वैरकलहौ तन्वन्तु धैर्यं सदा
गृह्णीतेत्युपदेशमाह च यती गान्धी महात्माऽमरः ॥

(३)

दृढनिगडनिबद्धां भारत श्रीं च दृष्ट्वा
व्यथितकरुणदृष्टिर्यस्य जाता स्वदेशे ।

स्वपरजनविभेदं यो बिभेदाऽतिदैन्यं
सजयति हि महात्मा गान्धि "बापू" जगत्याम् ॥

(४)

सर्वोन्नतिर्भवतु कोऽपि न दुःखभागी
भूयाद्धि भारतजने समता समन्तात् ।
न्यायश्चकास्तु सततं न परस्वहर्त्ता
देशेऽस्तु गान्धिमहतो हृदयं सदासीत् ॥

श्रीकृष्णमोहनठक्कुरः

(१)

नरं सास्रं दृष्ट्वा विकलहृदयः साश्रु यतते,
निराकर्तुं कष्टं तदविरतयत्नैरनुदिनम् ।
स्पृहैका यस्यासीन्न च भवतु साश्रुस्त्रिभुवने
महात्मा गान्धीर्भोः करुणहृदय. सन्दिशति नः ॥

(२)

विपन्नस्नेहार्द्रानिरतिशयकारुण्यजलधिः
कठोरो निर्भीको विनियमविधौ शास्ति निपुणः ।
निजक्लेशान् धीमान्स्त्ववगणयते सोऽतिसुकरं,
महात्मा गान्धीर्भोः सरलचरितो ह्यादिशति नः ॥

(३)

वरं कारागारं गणयति सदा देशनिरतः
सदा पापं द्वेष्टि त्वघमयनरं यो न च कदा ।
विशुद्धे लक्ष्येऽपि ह्यभिलषति मार्गंस्य शुचितां,
महात्मा गान्धीर्भो धवलचरितो ह्यादिशति नः ॥

विमला देवधरः

(१)

निरस्तशस्त्रोऽपि जितारिसंघो
योऽकृष्ण लीलोऽपि च कृष्णलीलः ।
असत्यरागेऽपि च सत्यरागो
गान्धी महात्माऽजनि भीष्मतुल्यः ॥

(२)

यशः शरच्चन्द्रकराभिरामं
द्राक्षेव माधुर्ययुता हि वाणी ।
मनोहरो यस्य सदा स्वभावो
गान्धी महात्माऽनुपमस्सलोके ॥

(३)

उदारचेताः शिवविष्णुभक्तः
सत्याग्रही सर्वजनेषु रक्तः ।
अनाथदीनेषु सदा दयावान्
अलौकिकोऽयं स हि गान्धि नेता ॥

सुधाकरो मालवीयः

(१)

अहिंसासत्याभ्यां प्रबलतमशस्त्राच्च विजितं
स्वराज्यं स्वातंत्र्यं मधुरवचसा येन विहितम् ।
पिता राष्ट्रस्याऽयं विमलचरितो दुर्बलतनु-
र्महात्मा गांधीति प्रबलगुणशाली विजयते ॥

(२)

जना अन्नाभावे व्यथितहृदया वस्त्रविधुरा
निरीक्ष्येदं दृश्यं करुणहृदयः सोऽपि सुजनः ।

परिच्छिन्नं चान्नं वसनयुगलं धारयति यो
महात्मा गांधीति स्फुरति करुणापूतहृदयः ॥

(३)

नरा दीना जाता हतविधिवशादंत्यजकुले
जनैस्त्यक्ता दूरे मृगपशुसमा भाग्यरहिताः ।
प्रतिष्ठां प्रादाद्यो हरिजनसमाख्या प्रचलिता
महात्माऽयं गांधी हरिजनदयालुर्विजयते ॥

कमला चुनेकरः

दिव्यौषधम्

१

शास्त्राभ्यास ! भजस्व मौनपदवीं सौजन्य ! निद्रां व्रज
स्वेच्छाचार ! कृतं त्वदीयकथया पुण्य ! प्रयाहि द्रुतम् ।
वाञ्छस्यद्य समुन्नतं यदि पदं भद्र ! स्फुटं श्रूयतां
भण्डोद्दण्डपिचण्डपूरणकला तस्याऽस्ति दिव्यौषधम् ॥

२

क्लेशावेशवशीकृतस्य नितरां बाधाप्रबन्धोदयैः
किंकर्त्तव्यविमूढताहतधियो धर्मैकतानात्मनः ।
चिन्तासन्ततितापपापविलयव्यापारपारङ्गमं
स्वच्छन्दामृतवर्षि ! विश्वजननीनामैव दिव्यौषधम् ॥

श्रीबटुकनाथशास्त्री खिस्ते

(१)

सम्यक् त्रासयतोऽतिभीरुहृदयान् वन्यानधन्यान् मृगान्
कामं कम्पयतस्तरूनपि भृशं कण्डूयनैर्गण्डयोः ।
पद्भ्यां मर्दयतः किशोरकलभं भीतं स्फुटं कुर्वतो-
मातङ्गस्य मदज्वरप्रशमने सिंहोऽस्ति दिव्यौषधम् ॥

(२)

कोशाभ्यन्तररक्षितार्थनिचयैरुत्कृष्टलक्ष्मीवता-
मेवोत्कर्षमवेक्ष्य तान् वितरितुं सामान्यलोकेऽधुना ।
मित्राणामपि गर्हणं स्वशिरसि न्यस्येन्दिरासाहसाद्
उक्त्वा राष्ट्रियसम्पदं कृतवती दैन्यस्य दिव्यौषधम् ॥

(३)

ज्योतिर्ध्वान्तचयस्य, वारि सुतृषः, क्षान्तिविरुद्धागसः,
सन्तोषोऽर्थजुषो, विवेककिरणो जाड्यागमस्यान्वहम् ।
निर्वाणोन्मुखदीपकस्य रुचिरस्नेहो, गिरो व्याकृति-
र्दुर्व्याधेःप्रथते रसायनमिहामोदाय दिव्यौषधम् ॥

(४)

उत्सेके दमनं, मनोजविजये धैर्यं, विलासे बलं,
चाञ्चल्ये स्थिरसंयमः, समुदये सर्वोदयाकांक्षिता ।
भूतौ दानमुदारता च मनसः प्राप्तेऽधिकारे, द्विजे
निर्व्याजाचरणं भवे भवरतिर्गीयेत दिव्यौषधम् ॥

(५)

शासितानां कुलं व्याकुलं कुर्वतस्तामसं मानसं दुष्प्रभोः सर्वथा ।
न प्रकाशेत तावत्स्फुटं निर्मलं यावदाप्नोति न ज्ञानदिव्यौषधम् ॥

पं० रतिनाथ झा

(१)

नीलाम्भोजसुकेशचन्द्रवदना स्वर्णाभवर्णालता
बिम्बोष्ठी मधुजित् सुधोपमवचोदन्तोज्वला दीपिका ।
स्पृश्या चित्रवरार्चितस्तनतटी क्षीणोदरी सुन्दरी
दृष्टानां नवकामबाणभुजगैर्दिव्यौषधं कामिनी ॥

(२)

श्रीरामनामामृतवस्तुयेषां सदानने तिष्ठति मानवानाम् ।
तस्मात्परं किं सुलभं सुरम्यं दिव्यौषधं तद् वदतु प्रकामम् ॥

रामरूपपाठकः

(१)

मृत्योर्भयं तव कुतः स्मर लक्ष्मणं तं
प्राणानवाप हनुमत्सहयोगतो यः ।
हालाहलस्य न हि शक्तिरिहास्ति नूनं
दिव्यौषधं यदि तवास्ति हि शक्तिरूपम् ॥

(२)

नो तीर्थं हि सुसेवितं न सततं सत्सेवनं वा कृतं
श्रौतस्मार्तसुधर्मपालनविधौ नो वा मनस्त्वर्पितम् ।
ईर्ष्याद्वेषविषाग्निदग्धमनसा पुण्यं न वा संचितं
तस्य क्लेशनिवारणाय भगवन्नामैव दिव्यौषधम् ॥

कृष्णमोहनठक्कुरः

(१)

पीयूषाधिकसारभाषणकरी मीनेक्षणा कामिनी
पीनोत्तुङ्गकुचा प्रिया मधुधरा बिम्बाधरा सुन्दरी ।
श्यामाङ्गी मदविह्वला शशिकला लीलोन्मुखी प्रेयसी
स्वाङ्गे स्याद्यदि मानिनी प्रियसखे तन्मुञ्च दिव्यौषधम् ॥

व्रजकिशोरः त्रिपाठी

(१)

लोकाः स्वार्थतृषातिशुष्कमनसः कामात्मवातेरिताः
जाता वैभवशीर्णपूतिमदिरापानोन्मदैर्मूर्च्छिताः ।
विद्यालोकविनाकृतैर्हि नितरामन्धास्तमोभिर्वृताः
किं ब्रूमः खलु सन्ति यक्ष्म विधृताश्चिन्त्यं हि दिव्यौषधम् ॥

केदारनाथः त्रिपाठी

(१)

क्षुत्क्षामोऽसि पिपासितोऽस्यशरणो दीनोऽसि दुःखान्वित-
स्तिष्ठ त्वं ! सुभिषग्वरोऽर्पयति ते कृत्स्नेन सत्पुष्टिदम् ।
अज्ञानान्धतमोहरं, सुखकरं, रुङ्मात्र-संहारकं,
वित्तागारनियन्त्रणं समुचितं रोगघ्नदिव्यौषधम् ॥

(२)

आधिव्याध्यवहेलनानिकृतिभिस्तप्तो वराको यदा,
न न्यायं न च भेषजं समुचितं प्राप्नोति दीनो जनः

संसारे धनहीननिर्बलकृते कालो भवेत् केवलं
सद्यो विस्मृतिदं क्षमं ह्युपशमे शूलघ्नदिव्यौषधम् ॥
विमलादेवधरः

(१)

आयुर्वेदपयोधिमन्थनपरैर्याञ्चा कृता याऽधमा
श्रीकारस्य समक्षलक्षगुणिता नीतिः प्रवेणीमयी ।
उत्थानाय समग्रलोकनिवहेनाराधिता भारती
मन्ये नास्ति समाजतन्त्रनिपुणं वैद्यस्य दिव्यौषधम् ॥
डा० ज्योतिर्मित्र आचार्यः

(१)

दानेयैर्नवराटिकाऽपि निहिता पादौ न तीर्थं गतौ
कर्णौ केवलरागतालनिरतौ नामामृते नो रतौ ।
चक्षुर्यस्य न दर्शनेन सफलं शैवाङ्गसंप्रेक्षणे
तेषां भीमभवार्णवाधिदलने नामैव दिव्यौषधम् ॥
भालचन्द्रपाण्डेयः

(१)

छिद्रान्वेषी खलोऽयं मम गृह निकटं वर्त्ततेजागरुको
मन्ये मित्रं ममायं मदवगुणगणाः प्रेक्षिता येन नूनम् ।
नित्यं सन्दर्श्य दोषानुपकृतिमहसा शोधितो दोषपङ्को
निन्दा नेयं न वैरं ददति चिरसखा शुद्धदिव्यौषधं मे ॥
कमला चुनेकरः

(१)

देशेऽस्मिन्नधुनाऽपि केनचिदपि श्रोतुं न शक्यं शुभम्
नेतृणाञ्च मतं विलोक्यत इदं हिंसा विधेया सदा ।
राष्ट्रोत्थानमहो भवेद्वदकथं यद्रुग्णमेतादृशं
सर्वैर्गांध्युपदेश एव सततं ज्ञेयश्चदिव्यौषधम् ॥
युवराजशर्मा वरालः

शरन्नितान्तम्

(१)

मरालमालाधवलाम्बरश्रीः
परागरागाञ्चितकञ्चुकेयम् ।
मुदे कवीन्द्रस्य न कस्य भूयाद्
वधूः स्मरस्येव शरन्नितान्तम् ॥

(२)

पुरा घनालीप्रतिरोधतान्तं
सुधाकरं सम्प्रति वीक्ष्य कान्तम् ।
प्रसाधिताशं पुरतो विभान्तं
प्रमोदमभ्येति शरन्नितान्तम् ॥

(३)

लसत्प्रसूनावलिमादधाना
चलद्द्विरेफोदितमञ्जुगाना ।
स्वयं प्रयान्ती रसिकेव कान्तं
मनो हरत्येव शरन्नितान्तम् ॥

श्री बटुकनाथशास्त्री खिस्ते

(१)

मुक्ततिद्युतिविभावितताराकस्रक्
चन्द्रप्रभामुखसुधाधवलीकृताशा ।
ज्योत्स्नोज्ज्वला नयतु हंसगतिर्विकासं
सा शारदेव सुमनांसि शरन्नितान्तम् ॥

डा० भोलाशंकरो व्यासः

(१)

प्रसन्नवक्त्रा विमलेन्दुवर्णा
प्रसाधयन्तीकुसुमैर्नताङ्गी ।
स्वान्ते समेषां मुदमादधाना
बालेव सज्जा हि शरन्नितान्तम् ॥

(२)

आदाय गन्धं कुसुमावलीनां
सन्धारयन्ती मदविह्वलाङ्गी ।
प्रकाशयन्ती निजहासलक्ष्म्या-
नन्दप्रदा कापि शरन्नितान्तम् ॥

(३)

विभूषयन्ती सुधया निजाङ्गं
सङ्गोपयन्ती निजकान्तमन्तः ।
मन्दं हसन्ती सुषमाभिरामा
रामेव बाभाति शरन्नितान्तम् ॥

(४)

घने गते निर्मलपूर्णचन्द्रं
संवीक्ष्य बालेव विकारभावा ।
समागता विह्वलतामुपेत्य
कान्तं प्रसुप्तं हि शरन्नितान्तम् ॥

(५)

शरन्नितान्तमानन्दं प्रददाति सुमस्मिता ।
परिधाय नभः शाटीं ताराविन्दुवती निशि ॥

कृष्णमोहनठक्कुरः

(१)

रम्भोपमा मलयचन्दनलिप्तगात्री
गन्धाढ्यपद्मवदनागजरत्नहारा ।
पीनोद्भवाम्बरधरावनिता नवीना
शुभ्रा नदी हिमरुचिश्च शरन्नितान्तम् ॥

रामरूपः पाठकः

(१)

नैकर्तवो यद्यपि सप्रभावा
जगन्ति नूनं परिपोषयन्ति ।
सर्वेषु तेष्वस्ति विशेषरम्या
शुभ्रेण वेषेण शरन्नितान्तम् ॥

(२)

दिव्यच्छटाच्छादितभूविभागा
व्योमान्तरालेषु विशेषशुभ्रा ।
लोकानशोषानपि मोहयन्ती
संदृश्यतामद्य शरन्नितान्तम् ॥

(३)

यस्यां विमुग्धो व्रजनन्दनोऽपि
वृन्दावने रासमहो ततान ।
गोपाङ्गनामण्डितकान्तिरेषा
समागताऽद्यापि शरन्नितान्तम् ॥

(४)

कासारमालासु विलोकनीय—
मम्भो यदा सज्जनचित्तशुभ्रम् ।
आकाशमार्गे सितमेघमाला
तदा समायाति शरन्नितान्तम् ॥

(५)

नवीनसंचारणमादिशन्ती
मनोमय-प्राणमय-प्रपञ्चे ।
आह्लानदाने कुसुमायुधाय
कृतप्रतिज्ञेव शरन्नितान्तम् ॥

शिवदत्तशर्मा चतुर्वेदः

(१)

प्रमदा समदा सदाऽऽलसा मुकुटमानमोघं
वरटा तुहिनस्तनूरुहैर्वियति गच्छतीह ।
चपला विगता बलाहकैर्लपितगात्रशान्तै—
खसादमलीमसं विभाति हि शरन्नितान्तम् ॥

डा० ज्योतिर्मित्र आचार्यः

(१)

चण्डातपेन दहतीव नरं निदाघो
वृष्टिः सदाऽकुलयते ननु दुर्दिनैः सा ।
प्रीणाति पंकरहिता समशीतातापा
कान्तेव कान्तवपुरद्य शरन्नितान्तम् ॥

विमला देवधरः

(१)

वर्षास्तु पंकिलजलेनसमं प्रयाता
लुप्ताऽधुना चपलया सह मेघमाला ।
धौतं प्रसन्नरमणीयतरं हि विश्वं
शोभामहो वितनुतेऽद्य शरन्नितान्तम् ॥

(२)

पूर्णाऽधुना स्फटिकशुभ्रजलैस्तडागा
नीलं तथांबरतलं विशदं निरभ्रम् ।

शृंगारिता कमलविद्रुमपुष्पभारैः
शुभ्रैश्चकाशकुसुमैस्तु शरन्नितान्तम् ॥

(३)

स्नाताः शशाङ्ककिरणैरधुना रजन्यो
मार्गान् प्रवाससुकरान् पथिकाः श्रयन्ते ।
पीयूषदैर्विधुकरैः परिवेष्टितेयं
ज्योत्स्नाभिषेण हसतीव शरन्नितान्तम् ॥

कमला चुनेकरः

(१)

चन्द्रानना स्मेरसरोरुहाक्षी
हंसक्वणन्नूपुरपादपद्मा ।
विभात्यलुप्ताग्रकुचाम्बरान्ते
वधूर्नवोढेव शरन्नितान्तम् ॥

(२)

चन्द्रार्द्रचन्दनविशेषितभालभागा ।
कञ्जेक्षणे मधुपकज्जलमादधाना ॥
एणाङ्गगन्धसुहृदैन्दवभाप्रहासा ।
संशोभते समदनेव शरन्नितान्तम् ॥

भालचन्द्रपाण्डे

(१)

उद्दामयौवनविवर्धितकाममाया—
जायां पयोधिनृपतेरपि कान्तिहीनाम् ।
मर्यादया विरहितामहितां प्रजानां
सद्यो नियन्त्रयति धन्यशरन्नितान्तम् ॥

(२)

वर्षासु हर्षभरनिर्भरजातवेगा-
मुन्नादिनीमिव विलेपितगाढ़पङ्काम् ।
कूलङ्कषामपि नियम्य विनिर्मलाङ्गीं
गाङ्गीं श्रियं वितनुतेऽद्यशरन्नितान्तम् ॥

(३)

सान्द्राम्बुदोन्नतघटावृतमित्रवृत्तं
ज्ञात्वा मरालकुललोपमिलाङ्गणाच्च ।
श्यामं घनं द्रुतमतो विनिहन्तुकामा
सज्जीकरोति धनुरद्य शरन्नितान्तम् ॥

(४)

वर्षातपाद्यसहदुःखशतानि मूर्ध्ना
धृत्वाकृषीवलकुलं कृषिकर्मसक्तम् ।
धान्यैः समेधयति सम्प्रति शारदीयैः
सद्यः फलार्पणपरेव शरन्नितान्तम् ॥

(५)

पद्मप्रसूनमकरन्दकदम्बितश्रीः
शेफालिकाकुसुमसौरभसंभृतापि ।
भानुं दिवा कुमुदबान्धवमप्यमन्दं
रात्रौ प्रसादयति किन्न शरन्नितान्तम् ॥

(६)

सन्तर्पयत्यथ पितॄनथ चाम्बिकायाः
पूजोत्सवं वितनुते जनहर्षहेतुम् ।
लक्ष्मीं समर्चयति दीपकमालिकाभि—
रामोदयत्यथ नरं च शरन्नितान्तम्

(७)

नीलाम्बरां कुमुदसुस्मितशोभितास्यां
कञ्जश्रियं धरणिमञ्चितखञ्जनाक्षीम् ।
द्रष्टुं समुत्सुकयतीव हरिं प्रसुप्त—
मुद्बोधनोत्सवमिषेण शरन्नितान्तम् ॥

रतिनाथ झा

(८)

चित्ते जले निर्मलतामुपेते
पद्माश्रिते हर्म्यसरोवरे च ।
प्रसादवत्यां वनितादिशायां
ज्ञेया समैस्तत्र शरन्नितान्तम् ॥

केदारनाथः त्रिपाठ

हिमागमः

(१)

उषसि सरसामभोजिन्या विलोक्य विपन्नता—
मुदयति परं वाक्योद्रेको यदीयविचेष्टितैः।
चरमवयसां विद्धत्यङ्गं समीरशरोत्करै-
र्मर्दयति शिशून् कोऽयं स्वैरी विभाति हिमागमः।
—श्रीबटुकनाथशास्त्री खिस्ते

(१)

ज्वलनसदृशश्चक्षूरागो हि यत्र दिनाधिपो
रतिपतिमृदुः शय्याश्लेषो हि यत्र निशापतिः—
स हि विरहिणी वक्षः शाटीकुटीरचरानल-
क्षपिततुहिनस्तोमो यूनां विभति हिमागमः-
डा० रेवाप्रसादद्विवेदी

(१)

असुन्दरस्याहनि या हिमांशोः
कलां विलोक्योल्लसतीव पद्मिनी।
ततोऽतिकोपात् कुलमेव तस्या
निहन्ति तन्मित्रतया हिमागमः॥

(२)

द्विजमथामृतमप्यखिलप्रियं
सरसिजं च विरूपयितुं भृशम्।
जगति मित्रमतिप्रणयास्पदं
शिखिनमातनुते च हिमागमः॥

(३)

नहि धनं न सुशासनजासनं
समधिकर्त्तुमनाचरितं शुभम् ।
अपनयादपयाति रसातलं
चिरसमर्जितसन्महिमागमः ॥

(४)

प्रियं द्रुतं गन्तुमिवाम्बराञ्चलाज्
झटित्यकस्मादुपसंहृतश्रियम् ।
मुहुर्मुहुः प्रार्थयते सरोजिनी
निशागमे नाथ, बहिर्हि मा गमः ॥

—रतिनाथ झ

(१)

निहन्ति सद्यः प्रकृतिं सुकोमलां
सदागतिं स्तम्भयतीव दुर्दमः ।
असूयतीव द्विजराजसम्पदे-
तनोति जाड्यं नितरां हिमागमः ॥

डा० गजाननशास्त्री मुसलगांवक

(१)

गुरूष्णवाससां सौख्यं सौख्यं भोज्यानुपानयोः ।
अङ्गनालिङ्गने सौख्यं तस्माद्रम्यो हिमागमः ॥

(२)

ऋतुलक्षणमालोच्य सम्बाधोत्पीडनोचितम् ।
नोचितं प्रस्थितं मन्ये कान्त त्यक्त्वा हि मागमः ॥

—श्री दामोदर गौ

(१)

विभावरी यातु विभावनर्त्त की
निशीथ शय्या भवदन्तिके स्थिरा ।
त्वरा न कार्या रतिनाथसेवकै-
रिहास्ति सुप्तो भवतां हिमागमः ॥

(२)

हिमालयो नास्ति शशाङ्कपण्डितः
कवीश्वराणामधिकारकारकान् ।
जनान् निपीतासवसीधुमद्यान्
प्रतीक्षते नर्मविदो हिमागमः ॥

(३)

हिमागमो वाचि, हिमागमो गतौ,
विधौ, धरायां, भुवने हिमागमः ।
विभावसौ गन्धवहे हिमागमो
निशागमे शान्तमना हिमागमः ॥

(४)

सुतूल शय्या नवरत्नमण्डिता
निशा शशाङ्का रणनार्तकौतुका ।
मधूत्सवं मानयितुं नितम्बिनी
कवीश्वरं प्रार्थयते हिमागमः ॥

—डा० ज्योतिर्मित्र आचार्यः

(१)

निशि निशि बृहद्भानुं भानुं दिवा शरणं गतो
भवति मनुजः सुप्तो गुप्तः सतूलपटादिभिः ।

यदि लघुरिता शङ्का लङ्कारणाग्रमुपस्थितं
गलयति बलादङ्गं संगम्य हन्त हिमागमः ॥

(२)

कृतवताप्यपराधमनेधा
प्रियतमेन सदैव समागमम् ।
समभिनन्दति शीतमयात् प्रिया
कमिह मोदयते न हिमागमः ॥

(३)

अपि कमलिनी शङ्के पङ्के भिया निलयं गता
जनयति मरुत्कम्पं पम्पाजलं ज्वलनायते ।
तुहिनशकलव्याजाद् राजाभितोऽश्रु विमुञ्चति
प्रथितमहिमारामो रम्भोरु कोऽपि हिमागमः ॥

(४)

पृथगवस्थितिमाशु निवारयन्
हरति मानमहो हरिणीदृशाम् ।
वितनुते दयितां श्रयतां सतां
रसमयं समयं स हिमागमः ॥

(५)

जहिहि मानिनि मानमयेऽधुना
ननु धुनाति तनुं शिशिरोऽनिलः ।
प्रियवपुःपरिरम्भरसस्पृहां
सुतनु ते तनुते न हिमागमः ॥

—श्री रामनारायणदत्त शास्त्री

(१)

सरससस्यसमृद्धिसमन्वितो
नववधूरसकौतुकवल्लभः ।

सुरसभोजनपाकसुखप्रदो
रुचिकरः समुपैति हिमागमः ॥

(२)

विरहिणीविरहाग्निसमीरणो
निशि विशेषतया सुषमान्वितः ।
युवजनप्रियकृद् वसुधातले
विजयते रमणीयहिमागमः ॥

—श्री कृष्णमोहनठक्कुरः

(१)

उत्साहो दीर्घसूत्रत्वे विवेकश्च क्रियाविधौ ।
व्यसनाभावसौहार्दे यत्र तस्मिन हिमागमः ॥

(२)

लक्ष्मीः स्वपति पुत्राणामादरं यत्र पश्यति ।
भवान् जानातु तदगेहे भवत्येव हि मागमः ॥

—श्री नवरङ्ग चतुर्वेदी

(१)

युवतयो युववल्लभसङ्गता
मुमुदिरे रतिरागवंशगताः ।
अकथयंश्च मनोहरवार्तया
कथय नाथ कथं नु हिमागमः ॥२॥

—श्रीचन्द्रभूषणः चौधरी

(१)

शीतवातेन दुःखेन पीडितैर्निर्धनैर्जनैः ।
प्रकम्पमानैः सततं प्रार्थ्यते स हिमागमः ॥

(२)

शासकाः शासिता वापि मूर्खा वापि विचक्षणाः।
कामयन्ते सदा स्यान्नः समुत्कृष्टो हिमागमः॥

(३)

हिमागमे वा शिशिरे वसन्ते वाथ ग्रीष्मके।
वर्षासु वापि शरदि त्वयि प्रीतिर्हिमागमे॥

(४)

सा चञ्चला चला लोकाश्चालकं जगतः परम्।
चित्ते चिन्तय संचिन्त्य निश्चलं जहि मागमम्॥

(५)

यथाग्निर्न वितृप्येत घृतधाराशतैरपि।
कामी कामोपभोगेन तथैवनहि मागमैः॥

(६)

भृशं नमोऽस्तु महते सर्वलोकगरीयसे।
सदा हि मागमायास्मै निर्गुणाय गुणात्मने॥

—श्री जगन्नाथशर्मा

(१)

उपगमं तुहिनस्य निशम्य यत्
त्वशरणेव बिभेति मृणालिनी।
न खलु तद् वद किं महदद्भुतं?
कमलिनी स्वयमेव हिमागमः॥

—विमला देवधरः

कमलिनी

(१)

तुषारव्यापारैः खलनिकरसञ्चारसदृशै—
रविस्फूर्जत्तेजस्युपरमति नाथे दिनमणौ ।
विलुप्यद्व्यालोलभ्रमरपरिवारा मुकुलिताऽ
धरस्पन्दा सन्दानितहृदयबन्धा कमलिनी ॥

श्री बटुकनाथशास्त्री खिस्ते

(१)

सतीनां सम्मानं सततमुपलेभे पयसि या—
स्थिता शश्वत् सूर्योऽपचितिमुपचित्य प्रियतमे ।
परं सा चुम्बन्तं मधुपमनिवार्यं स्ववदनं
जहौ कीर्त्तिं शुभ्रां युवतिकुलनम्यां कमलिनी ॥

(२)

जनिस्तावत् पङ्काद् वसतिरपि नित्यं बहुजले
सुधांशुविद्वेष्यो मधुपनिवहोऽयं सहचरः ।
प्रियो रात्रौ हित्वा प्रतिदिवसमन्यत्र रमते
तथापीयं फुल्ला प्रकटयति गन्धं कमलिनी ॥

(३)

म्रदिम्नो निर्यासैरसमसुषमाया रसभरैः
परामोदोत्कर्षैरथ च मकरन्दैरनुपमैः ।
मिलिन्दानां पुण्यैरनिलकुलसौभाग्यविभवैः
सरोलक्ष्म्या हर्षैर्जगति रचितेयं कमलिनी ॥

(४)

वनान्ते राजन्ते कति न सुकुमाराः सुमनस—
स्तदीयैः सद्गन्धैर्विलसति न चाल्पः परिसरः।
परं धन्याऽवन्याः सुकृतशतजन्या निरुपमा
रमाया मङ्गल्यं कुलभवनमेषा कमलिनी॥

(५)

प्रियं पद्मासद्मालिकुलविपुलोल्लासजननी
मरालीनां केलीकरणनिपुणा काचन सखी।
वयस्या सारस्या दिवसनृपतेः प्राणदयिता
कवीनां सर्वस्वं जयति ललितेयं कमलिनी॥

रतिनाथ झा

(१)

व्यतानीद् या शोभां सरसि मधुलोभान्मधुलिहां
समूहौ यामारादवृणुत समाराधनपरः।
अहो क्रूरः कालो विमलकमलालोकवसति—
र्हिमानीसंपाताद् विलयमुपयाता कमलिनी॥

(२)

वसत्यै पद्मायाः सततसुखसद्मानि सृजति
सपर्यापर्यायानमरसमुदायाय तनुते।
परागैश्चामन्दैः सुरभि मकरन्दैर्न सुखये—
न्नरं कं नारीं वा कमलिमलिनीं वा कमलिनी॥

श्रीरामनारायणदत्तशास्त्र

(१)

तिमिरहरणदक्षसकलगुणदा
भुवनविजयिनी द्रुतगतिचपला ।
प्रणमति सततं कृतभवविजया
तरणिशरणगा भवतु कमलिनी ॥

(२)

विहरति विपिने जलमलहरणे
मदयति भवने मधुकरमलिने ।
शमयति भुवने रतिपति निलये
सरलतरलवेश्मधरकमलिनी ॥

डा० ज्योतिर्मित्र आचार्यः

शिशिरः

समुन्मीलत्कुन्दावलिमिलितमन्दानिलदिशा
समारब्धस्पन्दानुपवनमिलिन्दान् विरचयन् ।
समन्दाक्षान् यूनः कुसुमशरसन्धानविकलान्
विधत्ते सानन्दान् प्रणयरसबन्धाय शिशिरः ॥

श्रीबटुकनाथशास्त्री खिस्ते

(१)

भास्करस्तुहिनवलयो दृश्यते कुहरगगने
मानिनीमदनभवनं कामुको व्रजति शिशिरः ॥
इत्वरी कुचरलगुडा वेपते खपुरलपना
जायकसुरभिनिधाना भामिनीव खलु शिशिरः ॥

(२)

शंकरः स्वपिति शीतसमुदयात्
पर्वते न पिशुनो बटुवसनः ।
पार्वती तिमिरशत्रुशरणगा
दीर्घरात्रिबहुलः किल शिशिरः ॥

डा० ज्यतिमित्र आचार्यः

(१)

वसन्ते वासन्ती व्रततिविलसन्तीं मधुवतीं
मुहुः स्पृष्टां कुर्वन्तुहिनपुलकां वेपथुमतीम् ।
सदा राधाकृष्णाननसुरभिनिष्णातवपुषा
ऽखिलं खेदं धीरः शमयतु समीरोऽतिशिशिरः ॥

(२)

बहून् व्योम्नीवेन्दून् श्रमसलिलविन्दून् मुररिपो-
र्विमार्जस्ताम्बूलं सुरभिमुखमूलं नयति यः।
कृपादक्षो दक्षो विधृतनिजपक्षो विधुमुखि
स नः शल्यं शस्तो हरतु तव हस्तोऽति शिशिरः।

—रामनारायण दत्त पाण्डेयः

आनन्दमन्दानिलः

(१)

कीर्णोऽनेकतुषारहारनिकरः सिद्धार्थविद्याखिल-
प्रान्तः कान्तदिवाकरांशुमसृणस्पर्शः प्रभातोदये ।
रोमाञ्चाहितकञ्चुको मृगदृशां वक्षोरुहालिङ्गन-
व्यासङ्गप्रणयी प्रवाति शिशिरे सानन्दमन्दानिलः ॥

श्री बटुकनाथशास्त्री खिस्ते

(१)

इन्दिरा चेन्दिराऽभूदमीषामहो
येऽधुना राजनीतौ सुधास्यन्दिनः ।
भारतं भारतं कर्त्तुकामः सदा
वातु नो नित्यमानन्दमन्दानिलः ॥

डा० ज्योतिर्मित्राचार्यः

(१)

सन्ध्यायां कुसुमाकरे सुखकरे काचित् कदाचिद् गता ।
कुञ्जे रम्यलतावितानबहुले श्यामा हसन्ती मुदा ।
तां तन्वीं प्रमदां प्रसन्नवदनां संमोह्य चेष्टाशतै-
स्तद्वस्त्राञ्चलकर्षको विजयते सानन्दमन्दानिलः ॥

श्रीजगन्नाथशर्मा

(१)

ज्योतिर्मण्डलमण्डिते विरजसो नीरेण नीराजिते
सा मोदे शतशृङ्गतुङ्गशिखरे मन्दारसान्द्रे वने

गोलोकापरनाम्नि धाम्नि परमे सच्चित्सुखे निर्मले
राधामाधवयोर्जयेन्मिलितयोरानन्दमन्दानिलः ।

(२)

षट्शास्त्राण्यूतवः श्रुतिः शुभतरा शोभामयी वाटिका
साहित्यान्यभृतश्च मञ्जुलकलालापा मुदं तन्वते ।
मैत्र्यादिद्युतिदीपिकार्चिषि महावैराग्यतुङ्गाचले
विद्यासंगमने चिरं विजयतामानन्दमन्दानिलः ॥

श्रीरामनारायणदत्तपाण्डेयः

(१)

देशे शान्तिसुखावहः प्रियसुहृद्वर्गैः समाराधितो
रम्योद्यानसुपुष्पिते सुमधुपैः संगीयमानोऽभितः ।
मोदं संजनयन् प्रवातु विविधक्लेशाधिकं वारयन्
सर्वेषां बहिरान्तरं हि सततं सानन्दमन्दानिलः ॥

श्रीकृष्णमोहनठक्कुरः

(३)

सुखदा क्षणदा कलनं शयनं
मधुसीधुसुरासवपानमयम् ।
भवतान्न मनो यदि खिन्नमहो
श्रयतां मदनार्त्तमनाः शिशिरः ॥

डा० ज्योतिर्मित्र आचार्यः

राजते राजनीतिः

(१)

परपुरुषविमोहव्याप्तता मज्जुहास—
च्छविसहजसपर्यातोषिताशेषचित्ता ।
प्रतिदिवसनवीनस्वामिगा वारनारी—
सरणिमनुसरन्ती राजते राजनीतिः

(२)

चन्द्रो वैरं वहति कमले ख्यातमेतत्तथाऽपि
स्निग्धापाङ्गी भवति कमला बन्धुभावं स्मरन्ती ।
मध्ये तस्याऽऽपतति चरणो वारणस्येव यावत्
तावज्जाता विधिविधुरता राजते राजनीतिः ॥

श्रीबटुकनाथशास्त्री खिस्ते

(१)

यदपि कुटिलकालातङ्कनिष्क्रान्तलक्ष्मीः
क्षपितविरुदमानो नाद्य राजैव कश्चित् ।
न च दलितजनानामुन्निनीषेति नीति—
स्तदपि जगति काचिद् राजते राजनीतिः ॥

(२)

असुलभसुखभोगासक्तचित्तः प्रशास्ता
जनधनमपहर्तुं यत्तनोति व्यलीकम् ।
तदिह भरतभूमौ स्वार्थसम्पादयित्री
खलविभवसवित्री राजते राजनीतिः ॥

(३)

सपदि न गणनीया योग्यता काचिदास्ते
शुभगुणमणिमाला नाधिकण्ठं चकास्ति ।
प्रतिदिशमभिलाषान् पूरयन्तीव पुंसा—
मधिभुवनमिदानीं राजते राजनीतिः ॥

(४)

व्यवहरति न नीतिं दैन्यसैन्यं निहन्तुं
स्मरति न जनतायास्तापनाशाय योगम् ।
निजविजयसमृद्धेरिन्दिराकामराजो—
भयकुशलकलाया राजते राजनीतिः ॥

(५)

क्षपयितुमतितीव्रं मात्स्यवृत्तिं जनाना—
मिह जगति कृताभूद्दण्डनीतेर्व्यवस्था ।
सपदि सकलबङ्गे षूग्रभङ्गप्रवृत्ते—
रभिनय इव मञ्चे राजते राजनीतिः ॥

(६)

व्यथितहृदयशान्तेः स्यान्न वा स्यात् प्रबोधः
परमतिसुविधाया आसनं मेऽस्तु सुस्थम् ।
इति मनसि समीहां रक्षतां दक्षतायाः
प्रकटितबहुरूपा राजते राजनीतिः ॥

(७)

शिथिलितपरिवारस्नेहबन्धाद् गृहेषु
क्षतविनयविभूत्या भारतीमन्दिरेषु ।
मनसि वचसि कार्ये भिन्नतायाः प्रसारात्
प्रतिदिवसमिदानीं राजते राजनीतिः ॥

(८)

सेवाभावो गलितविभवः शासनस्याधिकारात्
सौहार्दं तु व्यपगतमितश्छद्मतायाः प्रसारात् ।
नैवाचारो रुचिररुचिरो धर्मनीतिर्न मान्या
राजन्यानां तदिह जयिनी राजते राजनीतिः ॥

(९)

प्रीतिः कौटुम्बिकी क्व, क्व विगत विभवे श्रीमतां स्निग्धदृष्टिः
प्राचार्येषु क्व भक्तिः क्व च विनयधनाधानयत्नप्रसक्तिः ।
विद्यागारे क्व शान्तिः, क्व तरुणनिवहे पूर्णसन्तोषवृत्ति—
र्वैपुल्यं विप्लवानां जगति यदि जवाद् राजते राजनीतिः ॥

(१०)

सङ्कल्पः स्वार्थमूलः, परिजनविभवोत्कर्षकार्येऽनुरक्ति—
र्नानुष्ठानं जनानां महितहितविधिप्राप्तये निर्व्यलीकम् ।
सङ्घानामङ्गभङ्गे प्रवचनपटुता, लोककल्याणवार्त्ता—
वार्तास्वेव प्रसक्ता जनमनसि ततो राजते राजनीतिः ॥

रतिनाथ झा

(१)

मौहूर्त्ताः खिन्ना लब्धवित्तादिभावा
वाणी काणी जाता सुधासारसिक्ता ।
योषा दोषा कस्यास्ति (केनास्ति) गम्या सुगम्या
लम्बोल्लोला सा राजते राजनीतिः ॥

(२)

रूपाजीवा वशादसौ सौधहेला
लोलालीलां कासारसाराऽऽसमन्तात् ।

कान्ता शान्ता दान्ता गवीतन्त्रमन्त्रा
चित्रा भूषा सा राजते राजनीतिः ॥

(३)

परिलसति कला तूर्णं नवं शासनं यद्
वितरति किल मोदं शोकजालं च तन्वत् ।
विमलमलिनवेषा वागुरीवृत्तिकाया
कलकललपना सा राजते राजनीतिः ॥

(४)

समस्ते प्रदेशे गतं राजतन्त्र—
मिदं गुप्तकार्यं प्रणष्टं न, नष्टम् ।
सुधास्यन्दिनी नीरदैः प्रावृतेयं
क्षपानाशिनी राजते राजनीतिः ॥

ज्योतिर्मित्र आचार्यः

(१)

स्वदेशस्य सेवाविधौ यस्य बुद्धि-
र्न संदृश्यते नेतृवर्गेषु देशे ।
परं येन केनाऽप्युपायेन सिद्धिः
स्वकीयेष्वियं राजते राजनीतिः ॥

श्रीकृष्णमोहनठक्कुरः

यत्रासन् धर्मवृद्धा विदितगुणगणाः निर्जरैः कामिता नः
पूर्वे तत्रैव देशे भारतभुवि महावंचका लोकनिन्द्याः ।
आत्मानं रामराज्यस्थितिकरणसहं ख्यापयन्तोऽह्रियस्तैः
साम्ये वादे विलिप्ता जनहितमथिनी राजते राजनीतिः ॥

(२)

धर्मेऽपेक्षां त्यजन्ती जनमनसि करैः क्षोभमापादयन्ती
वर्णं लिंगं त्यजन्ती सकलमपि जनं चैकजातौ क्षिपन्ती।
पुत्रीं दायं दिशन्ती जननभरमहो गर्भरोधेन हन्त्री
प्राजातन्त्रं वहन्ती जनहितमथिनी राजते राजनीतिः॥

(३)

सच्छास्त्रान् सद्विचारान् परिणतिकुटिलैर्भारतीयेतरैस्तैः
पाश्चात्यैः साम्यवादप्रमुखनयभरैर्गर्तमेवाऽऽदिशन्ती।
भाषाया मोहसृष्ट्या निबिडमपि महादेशमेनं रुजन्ती
स्त्रीराज्यं बंहयन्ती जनहितमथिनी राजते राजनीतिः॥

श्रीगोपालचन्द्रमिश्रः

(१)

यदीयास्यरङ्गेषु लास्यं विधत्ते
सदा नूतनोदन्तजालैर्निबद्धा।
मनोहारिणी काऽपि वाणी विचित्रा
ध्रुवं तेष्वियं राजते राजनीतिः॥

(२)

कदा कस्य कुत्रास्ति किं चित्रणीयं
कदा वाऽपि कुत्रास्ति किं गोपनीयम्।
विचारप्रकारेषु ये सावधाना
जनास्तेष्वियं राजते राजनीतिः॥

(३)

समाचारपत्रेष्वसंख्येषु यस्याः
स्वरूपाणि घोराण्यथो मोहनानि।

लसन्तीह नित्यं जनान्दोलनानां
समुत्थापिका राजते राजनीतिः ॥

(४)

काले ह्यस्मिन् कराले जडिमविरसताद्वेषजालैरराले
प्रोद्यत्कौटिल्यजाले कथमपि मनसा मुष्टिमेयैः प्रपन्ने ।
ये लोकाः सन्ति नानाविधपरिचरणे जागरूका नितान्नं
तेष्वेवेयं सुतुष्टा परिचितविभवा राजते राजनीतिः ॥

शिवदत्तशर्मा चतुर्वेदः

(१)

ऐक्यंसम्पादयन्ती स्वपरविषमताभेदमुद्वासयन्ती
धर्म्यां राज्यव्यवस्थां कथमपि भुवने शाश्वतीं स्थापयन्ती,
शास्त्रज्ञानर्चयन्ती किमु निजजनतां तातवत् पालयन्ती
स्नेहं संवर्धयन्ती जगति विधिवशाद्राजते राजनीतिः ॥

(२)

सदसदखिलवाक्योच्चारणाभ्यासदक्षा
सरलपरुषभावैर्भावितान्ता सदैव ।
भवति विषमवृत्ता वारनारीव धूर्ता
तदपि वदति कश्चिद् राजते राजनीतिः ॥

ब्रह्मानन्दत्रिपाठी

सन्ति सन्तो वसन्तः

(१)

अविरलमधुधारास्यन्दिगीर्वाणवाणी—
प्रणयननिपुणानां सत्कवीनां समाजे ।
सरसपदकदम्बालम्बरोलम्बधुर्या
इह कति न लसन्तः सन्ति सन्तो वसन्तः ॥
—श्रीबटुकनाथशास्त्री खिस्ते

(१)

अनुदिनमभिवृद्धिं प्राप्य दुर्दान्तवर्गैः
प्रशममुपगतानां हिंसया खेलतीव ।
परिभवमुपयाताः साहसायत्तचित्ताद्
इह हतमहिमानः सन्ति सन्तो वसन्तः ॥

(२)

परहितमभिहर्त्तुं कूटकौटिल्यसारात्
प्रतिदिशमधुनास्ते दस्युवृत्तेः प्रवृत्तिः ।
सुजननिधननीत्या धन्यतां मन्यमानै—
रिह हृतधनमानाः सन्ति सन्तो वसन्तः ॥

(३)

दुरितहिममहिम्ना जातजाड्यातिरेकान्
मृदितसुरभिसम्पन्मानसाम्भोजभाजः ।
खलनिवहसहस्रोद्यत्कर्माभिभूताः
क्व दिशि सपदि हृष्टाः सन्ति सन्तो वसन्तः ॥

(४)

विततविभवतृष्णैर्भूरिकृष्णाभियोगै-
रनुपदभवभूतिप्राप्तयत्नप्रयोगैः।
शकलितकलितश्रीसौमनस्यैकबन्धा
जगति गलितगन्धाः सन्ति सन्तो वसन्तः ॥

(५)

अनुपदपदचिन्ताः सद्गुणग्रामलुब्धा
अनुपमरमणीयानर्थसार्थान् स्मरन्तः।
अभिमतशतवामा दक्षिणासक्तचित्ताः
कवय इव महान्तः सन्ति सन्तो वसन्तः ॥

(६)

सुरगिरमनुरक्ताः सादरं ये भजन्ते
विदधति पणलोभाद् विक्रयं ये न तस्याः।
नयविनयनदीष्णा आस्तिकाचार्यवर्याः
शुचिसरलहृदस्ते सन्ति सन्तो वसन्तः ॥

(७)

सूक्ष्मे तत्त्वे यदि मतिमतां नास्ति चित्तानुरक्ति-
र्नो बन्धुत्वं व्यवहृतिवशात् प्रीयते क्वापि लोके।
न श्रद्धास्ते विहितसुकृते, न प्रतीतिः प्रियेऽपि,-
प्रायेणास्मिन्नहनि न ततः सन्ति सन्तो वसन्तः ॥

(८)

नैवाद्यत्वे पथि रतिरतिप्रीतिरप्यद्य नाद्ये
हाहाकारः प्रचयमयते केवलं चार्थसार्थे।
सुप्ता शक्तिः सहजसहजा कृत्रिमैरभ्युपायै-
र्नीता लोके मुदितमनसः सन्ति सन्तो वसन्तः ॥

(९)

धन्यं धन्यं सुजनहृदयं ह्लादतेऽन्यप्रसादै-
स्तोषे पोषं गतवति हतं दैन्यसैन्याभियानम् ।
गर्वोऽखर्वो गलति नितरां तत्त्वबोधप्रवृत्त्या
सर्वं सुस्थं भवति भुवि चेत् सन्ति सन्तो वसन्तः ॥

(१०)

आज्यं प्राज्यं जठरदहने प्रक्षिपन्तोऽनुरागाद्
भोगासक्त्या मधुरमधुरं प्रत्यहं ये यजन्ति ।
स्थूलाकारा अशनवसन-प्रेम-मात्र-प्रसारा-
स्तीर्थे तीर्थे बृहति च मठे सन्ति सन्तो वसन्तः ॥

(११)

यत्र श्रेयोऽनुरागादधिसदनमथोत्साहवन्तः स्वधर्मे
सत्कर्माराधनार्थं सततमतितमां बद्धकक्ष्या मनुष्याः ।
तत्रैवाद्यानवद्या विगलिततमसः पुण्यवन्तो महान्तो
नो दृश्याः शस्यचित्तासुरुचिरचरिताः सन्ति सन्तो वसन्तः ॥

—रतिनाथझा

(१)

दया प्राणिवर्गेषु हिंसा न काचित्
सदा सर्वसौख्याय कष्टं वहन्तः ।
जराजन्मदुःखादिकं हर्त्तुकामाः
कियन्तो जनाः सन्ति सन्तो वसन्तः ॥

—श्रीकृष्णमोहनठक्कुरः

(१)

नेतारो गालिदानप्रसरलपनकाः भ्रष्टकर्मप्रकाशा
अन्योन्यं दोषरोषप्रकटनमुखरा नीतिजालं क्षिपन्तः ।

भङ्क्त्वा सीमां, स्वदेशं पतनहुतभुजि द्रष्टुमेवारभन्ते
चाद्यश्वो लोकहत्याव्रतनियमधराः सन्ति सन्तो वसन्तः ॥
—श्रीगोपालचन्द्रमिश्रः

(१)

विनेयाः प्रसन्नाः, परीक्षा ह्युपेता
मुधा रारटन्तो घटन्तः प्रयोगान् ।
ऋतौ प्राप्तवित्ता दयाविन्दुभूता
धरण्यां सदा सन्ति सन्तो वसन्तः ॥

(२)

कवीनामियं भारती भास्वती स्यात्
तुरीयोत्सवं कर्त्तुकामा वयं वै ।
अतः प्रार्थये पूर्णयोगाय भूयः-
सभायां सदा सन्ति सन्तो वसन्तः ॥
—डा० ज्योतिर्मित्राचार्यः

(१)

कालव्यालेन दष्टा विषमविषमयीं क्रूरतामुद्वमन्तः
केचित्कौटिल्यपूर्णा अपि मनुजतनुं नाममात्रं वहन्तः ।
केचित्सत्यं भुजङ्गाः परयुवतिरसास्वादसीधुं पिबन्तः
पर्याप्ताः क्वापि दृष्टाः कथय कलियुगे सन्ति सन्तो वसन्तः ॥

(२)

रागद्वेषप्रपञ्चान्वितमिति सकलं विश्वमालोक्य सद्यः
स्वात्मारामाः सुतादीनपि भवविभवं किञ्च देहस्य सौख्यम् ।
सर्वं सन्त्यज्य भक्त्या स्मरहरचरणाराधने दत्तचित्ता
भूत्वानिर्वाणकामाःशिवपुरि विरलाः सन्ति सन्तो वसन्तः ॥
—ब्रह्मानन्दत्रिपाठी

मंगलम्

(१)

साक्षात्कर्तुमहो ! समाधिनिरतः सत्यं शिवं सुन्दरं
काव्यब्रह्म निरन्तरं रसमयं सच्चित्सुखं ब्रह्मवत् ।
ओजस्वी मधुरः प्रसन्नवचनोऽलङ्कारझङ्कारितः
पायाद् वाचकवाच्यदेहरुचिरश्छन्दोऽम्बरः पूरुषः ।

(२)

अयि प्रखरविद्युदुल्लसितमेघमालासम-
प्रकाशितधनुर्लतोज्ज्वलित शूरहाराञ्चिते ।
धराधरपयोधरप्रसृतपूततीर्थामृतै-
र्वितीर्णनवजीवने ! जननि ! भूमि ! तुभ्यं नमः ॥

(३)

धारारुचेश्चिरमुदाराशया रुचिरमाराङ्कना ननु परा
क्षीरायिता वपुषि, नीरायिता मनसि कीरायिता वचसि या।
धाराधरोज्ज्वलितहाराभविद्युदिव सा राधिकाऽक्षिचलना-
नाराचरञ्जितमुरारातिना हृदयकारागृहे निगडिता ॥

(४)

कोलाहलोल्लसितलोला झरीरसिकमालाहरी नु विमला
ज्वालाऽनलस्य किमु, खेला स्मरस्य खलु लीला निसर्गरचिता।
हेला कवेरुत, मरालाङ्गनाऽपि हि सलीला पदांचितगतौ
कीलायिता झगिति, दोलायिताऽनुहरि सोल्लासमूर्तिरथ सा ॥

(४)

कामाग्निधेनुरिव नामाङ्किता चरमसीमाञ्चिता विधिकृतिः
हेमायिता मधुरधामायिता कुसुमदामायिता गुणनिधिः।
श्यामाऽलकैर्वयसि, वामा भ्रुवोर्न हृदि सोमार्द्धभा सुनिटिले
रामाऽप्यसौ हि बलरामानुजेन खलु कामान्धदृष्टिररचि ॥

जगन्नाथशास्त्री तैलङ्गः

अपालोयानाष्टकम्

(१)

रूसश्चामेरिका च प्रतिदिवसमुभौ तौ प्रतिस्पर्धमानौ,
लूनाऽपोलो च यानद्वयमतुलधनैः सुष्ठु निर्माय नूत्नम् ।
दुर्लक्ष्येऽप्यन्तरिक्षे झगिति बहुविधं प्रेषयामासतुः द्राक्,
किन्तु द्वावप्यभूतां सुचिरमसफलौ चन्द्रलोकं चरिष्णू ॥

(२)

भ्राम्यन् वर्षैरनेकैर्व्ययमकृत शतं चार्बुदद्रव्यराशिं,
प्राथम्यं प्राप चान्द्रस्थलमभिगमनेऽमेरिका रूसदेशात् ।
विश्वस्मिन् कीर्तिमानं प्रथयदवनितो द्यामपोलोविमानं,
आर्मस्ट्राँङ् चाल्यमानं शशिनि निजपदं प्राप्तुमभ्युज्जगाम ॥

(३)

भ्राम्यद्भ्राजिष्णु यानप्रसभतररयोद्भ्रान्तमस्तिष्क ऊर्ध्वं,
चन्द्रस्याकारमारादवनितलमिव प्रोन्नतं प्रेक्षमाणः ।
हर्षोत्साहप्रकर्षात् युगपदतितरां बिभ्रदभ्रान्तरेऽसौ-
आर्मस्ट्राँङ् द्रागपोलोभ्रमिभरभरितः सम्भ्रमादुच्चचाल ॥

(४)

चञ्चच्चन्द्रप्रकाशप्रतिहतनयनश्रीः स उड्डीयमानं,
यानं तिर्यक् प्रचाल्य क्षणमुपरि ययौ मण्डलाद्दूरमिन्दोः ।
उच्चादुच्चैरुपेत्य प्रतिकृतिमतनोद् भूयसीं तस्य भूयः
कोलिन्सैल्डून् सहायादवतरणतलं योग्यमन्वेष्टुमैच्छत् ॥

(५)

उद्गच्छन् यापयित्वा नभसि सरभसं त्रीणि वै वासराणि,
प्राणाँश्चासौ स्वकीयान् तृणमिव गणयन्नन्तरिक्षाध्वनीनः ।
नीलार्मस्ट्राङ्ततस्तौ झटिति च सुहृदौ द्वावपि प्रेर्यमाणः,
यन्त्रद्वाराऽऽत्मरक्षां विदधदनुपदं चन्द्रकक्षां विवेश ॥

(६)

कोलिन्स् प्रोच्चाल्यमानं भ्रमदतितरसा तच्च कोलम्बियाख्यं
यानं व्योम्नि प्रहाय क्षणमुपरि गतादीगलाख्याद् विमानात् ।
आर्मस्ट्राँङ्ग ऐल्ड्रिन् सहचरसहितः सोमवारे सुधांशो,
र्वक्षः प्रक्षेपणेन प्रथमचरणयोः कम्पयामास वीरः ॥

(७)

उत्तोल्य स्वां पताकामवनितलजनौ तत्र साकारराका-
नाथप्राकारभित्तौ भ्रमणमकुरुतां मण्डलाकारभूमौ ।
पश्चात्तौ पेटिकायामचिरमचिनुतां पांशुपाषाणखण्डान्
आर्मस्ट्राँङ्गेवमैल्ड्रिन् गगनविजयिनौ मानवौ द्वावभूताम् ॥

(८)

निक्सन्नामाङ्कितां तां शाशिशिरसि शिलां स्थापयित्वा तदीयं
चित्रं नीत्वा गृहीत्वा सकलमपिच तद् वस्तु यद्ग्राह्यमासीत् ।
आकाशाद् वेगवत्या यदहनि जयिनो यात्रिणो यानगत्या
पृथ्वीं प्रत्याययुस्ते तदहनि निखिलं विश्वमाश्चर्यमाप ॥

श्रीशिवजी उपाध्यायः

कविभारती-शुभाधिवेशने

सुस्वागतोपायनम्

श्रीमतां, विविधविद्याविद्योतमानमानसानां,
सुरसरस्वतीसमुन्नयनबद्धपरिकराणां, नितान्त-
दान्ताशयानां वाराणसेयसंस्कृतविश्वविद्यालयो-
पकुलपतीनां, डाक्टरगौरीनाथ शास्त्रिवराणां,

वाराणस्यां विहितवसतिःसर्वविद्यानुरागी
वल्गद्गङ्गासलिलहरीसिक्तमौलिर्मनस्वी ।
धावं धावं सरसरचना घूर्णमानः प्रमोदात्,
गौरीनाथः प्रबलयतु नः श्रेयसां सम्प्रदायम् ॥

विद्याः सर्वाः कलिविदलिता यत्र तत्र प्रकीर्णा
भूयो विद्वद्वदनकमलं प्रापयन्नुद्यमेन ।
प्रादुर्भूतः पुनरिव धरामण्डलानुग्रहार्थः
गौरीनाथः स इह विदुषां शेखरो माननीयः ॥

सैका लोके विदितविभवा भारती सत्कवीनां,
सौहार्दोद्यत्परिमलपरीरम्भसम्भाव्यमाना ।
नानाविद्वद्विहगकविताकाकलीलाल्यमाना
सन्तोषं वः प्रदिशतु मुहुर्मानसं रञ्जयन्ती ॥

कालेऽप्यस्मिन् विरलसुरवाग्वैदुषीसम्प्रदाये
सान्द्रोत्साहोदितवपुरियं कल्पनाकल्पवल्ली।
जीव्याद्युष्मत्तरुणकरुणापाङ्गपातैः पवित्रै
रित्येषां नः सविनयसमाराधनोद्गारधारा॥

इतिसहृदयवृन्दानन्दलुब्धान्तरङ्गः
प्रणतिविनतमूर्धा वैद्यविद्यानुरागी।
भिषगुदितकन्हैयालालनामा कराब्जे,
समुपंहरति पद्योद्यानपुष्पोहारम्॥

'कविभारती'
वाराणसी

निवेदक :—
वैद्य श्रीकन्हैयालाल भेडा